la | yod pa ma yin paḥi bum pa la ni blta bar bya ba ñid la rtog[3] par rigs pa yaṅ ma yin pas ḥdi ni mi rigs so ||

=यदि द्रष्टव्यत्वमभिव्यक्तं विशेषणभूतं वोभयथापीह द्रष्टव्यत्वं निष्प्रयोजनम्। इह द्रष्टव्यत्वमिदं परिकल्प्य[-मानं] द्रष्टव्यस्यार्थस्य स्वरूपमद्रष्टव्यस्यार्थस्य वा स्वरूपं कल्प्यते। यदि तावद्दृष्टव्यस्य स्वरूपं तदा किं तेन परिकल्पितेन। यदर्थं परिकल्प्यते [तस्य] तद्विनापि भावादेवेति न युक्ता कल्पना। अथाद्रष्टव्यभूतस्यापि द्रष्टव्यत्वं कल्प्यते। तदपि न युक्तम्। अशरीराणामपि द्रष्टव्यत्वप्रसङ्गाज्जातेन द्रष्टव्यत्वेनास्य विरोधाच्च द्रष्टव्यत्वं न जायते।

द्रष्टव्यत्वजातिवत्तत्।

यथा द्रष्टव्यस्याद्रष्टव्यस्य च घटस्य सर्वथा द्रष्टव्यत्वं न युज्यत इति जातिर्न सम्भवति तथाद्रष्टव्यभूतो घटः

सद्रूपोऽपि न विद्यते ॥

असतो घटस्य द्रष्टव्यत्वकल्पनापि न युक्तेतोदमयुक्तम् ॥ १० ॥

311

CSV : ḥdir smras pa | yul gzugs la sogs pa mṅon sum dag ni yod pa kho na ste | deḥi ḥdzin par byed pa mig la sogs paḥi dbaṅ po yod paḥi phyir ro || yod par gyur dbaṅ po ḥdi rnams ni gdon mi za bar raṅ gi yul ḥjug par ḥgyur dgos la | gaṅ du de rnams ḥjug pa srid pa gzugs la sogs pa don de dag ni mṅon sum yin no || bśad par bya ste | gal te dbaṅ po rnams kyi yoṅs su gcod par nus

[1] X brtag. [2] It is, in fact, c of the kārikā to which ba is added after skye. [3] X rtag.

par ḥgyur na ni gzugs la sogs paḥi don dag tu ḥgyur ba z'ig na | ḥgyur ba ñid kyaṅ ma yin no || ji ltar z'e na | ḥdi na mig la sogs pa lṅa po ni spyir ḥbyuṅ ba las gyur pa ñid du ñe bar ston la | de rnams kyi bya ba ni yul tha dad pas tha dad pa z'ig go || ḥdi ltar mig gis gzugs kho na mthoṅ gi sgra mi thos la ||rna bas kyaṅ sgra thos kyi[1] gzugs mi mthoṅ ṅo || gaṅ gi tshe de ltar |

=अत्राह। सन्त्येव प्रत्यक्षा रूपादिविषयास्तद्ग्राहकचक्षुरादीन्द्रिय-सद्भावात्। सङ्घातान्येतानीन्द्रियाण्यवश्यं स्वविषयेषु प्रवर्तन्त इत्यभिप्रायः। यत्र तेषां प्रवृत्तिः सम्भवति ते रूपाद्यर्थाः प्रत्यक्षाः। उच्यते। स्यू रूपादयोऽर्था यदीन्द्रियाणां परिच्छेत्तुं शक्तिः स्यात्। नैव त्वस्ति। कथमिति चेत्। इह चक्षुरादीनि पञ्च सामान्यतो भौतिकानीत्युपदर्श्यते। तेषां कार्यं [तु] विषयभेदेन भिद्यते। तथा हि चक्षुषा रूपमेव दृश्यते न शब्दः श्रूयते। कर्णेनापि शब्दः श्रूयते न रूपं दृश्यते। यदैवम्—।

mig ni ḥbyuṅ gyur rna de bz'in |
mig gis mthoṅ gi gz'an gyis min |
des na ṅes par las rnam smin |
thub pas bsam mi khyab par gsuṅs || 11 ||

In *a* all *ḥgyur* for *gyur*; Vx of CŚ and V's xylographs (rouge et noir) *sna*[2] for *rna*. In *b* after *mthoṅ* all *gis* for *gi*. In *d* Vx of CŚV *pa* for *pas*.

V cakṣur darśanato'bhinna cākṣuṣaṃ śrāvaṇaṃ tathā |
acintyaṃ karmaṇo nūnaṃ vipākaṃ proktavān muniḥ || 11||

The first half of it can in no way be accepted. I may suggest the following:

भौतिकमक्षि कर्णश्च दृश्यतेऽन्यापरेण न।
नूनं कर्मविपाकं तदचिन्त्यमुक्तवान्मुनिः ॥११॥

CŚV: mig ni ḥbyuṅ gyur rna de bz'in |
mig gis mthoṅ gi gz'an gyis min |

deḥi tshe ḥthad pa daṅ ḥgal baḥi bya ba srid paḥi phyir mig la sogs pa rnams kyi raṅ gi ṅo bo rtog pa ga la yod || ḥbyuṅ ba las gyur pa ñid du mtshuṅs (?)[3] bz'in du yul ḥdzin pa tha dad pa brtag

[1] X kyis.
[2] In the present case this reading can also be admitted though not supported by CŚV.
[3] X mdzuṅs. But these two words are not here appropriate.

par ni mi rigs so || mig la sogs pa rnams kyi[1] yod pa ñid ni yul ḥdzin pa las rjes su dpag pa yin na de yaṅ ḥgal bas mi srid de | deḥi phyir dbaṅ po yod pas yul rnams mṅon sum ñid du mi rigs so || gal te de ltar mig la sogs pa rnams mi srid na | deḥi phyir[2] ji ltar mig la sogs paḥi dbaṅ po ḥdi rnams las kyi rnam par smin paḥi ṅo bor rnam par bz'ag ce na | ci kho bo cag gis ḥdi rnams kyi rnam par smin paḥi ño bo ñid bkag gam || gal te mig la sogs pa rnams ḥgog par sgrub pas de ji ltar ma bkag ce na || kho bo cag ni rnam par dpyod pa don raṅ bz'in tshol ba lhur byed pa ñid kyi phyir ro | kho bo cag ni ḥdir dṅos po rnams raṅ gi ṅo bos grub pa ḥgog gis[3] mig la sogs pa byas śiṅ rten ciṅ ḥbrel bar ḥbyuṅ baḥi las kyi rnam par smin pa ñid ni mi ḥgog paḥo ||°

gaṅ mig ḥbyuṅ ba las gyur pa yin yaṅ gzugs kho na mthoṅ gi sgra mi thos z'es bya ba la sogs pa ḥdi ni mthoṅ ba yaṅ yin no || gaṅ gi phyir ḥdi de[4] ltar yin pa |

des na ṅes par las rnam smin |
thub pa bsam mi kyab par gsuṅs ||

dṅos po raṅ bz'in med pa rnams kyaṅ bya baḥi ḥbras bu ṅes paḥi phyir bcom ldan ḥdas kyis° las rnams kyi ḥbras bu rnam par smin pa bsam gyis mi khyab par gsuṅs so || 11 ||

=भौतिकमक्षि कर्णश्च दृश्यतेऽक्षापरेण न।

तदोपपत्तिविरुद्धकार्यसम्भवात्कुतश्चक्षुरादीनां स्वरूपकल्पना। तुल्येऽपि भौतिकत्वे विषयग्रहणभेदः कल्पयितुं न युज्यते। चक्षुरादीनां सद्भावो विषयग्रहणकर्मणानुमीयते। तदपि विरोधेन न सम्भवतीतीन्द्रियसद्भावेन विषयाणां प्रत्यक्षत्वं न युक्तम्। यद्येवं चक्षुरादीनि न सम्भवन्ति ततः कथमेषां चक्षुरादीनामिन्द्रियाणां कर्मविपाकस्वरूपव्यवस्था। किमस्माभिरेषां विपाक-स्वरूपं प्रतिषिद्धम्। यदि चक्षुरादीनां प्रतिषेधः साध्यते कथं तेन न तत्प्रतिषिद्धम्। अस्माकं विचारस्यार्थस्वभावन्यायतत्परत्वान्नास्माभिरिह भावानां स्वभावसिद्धेन प्रतिषेधेन चक्षुरादिकृतः प्रतीत्यसमुत्पन्नः कर्मविपाकः प्रतिषिद्धः।°

यच्चक्षुर्भौतिकमपि रूपमेव पश्यति न शब्दं शृणोतीत्यादि। दृश्यते ह्येदमपि। यस्मादेतदेवं

[1] X kyis.
[2] These two words seems to be unnecessary.
[3] X gi.
[4] X da.

नूनं कर्मविपाकं तदचिन्त्यमुक्तवान्मुनिः ॥
निःस्वभावानामपि भावानां कर्मफलनियमेन भगवान्[01] कर्मफलविपाकमचिन्त्यमुक्तवान् ॥ ११ ॥

312

CŚV: ḥdir smras pa | mig la sogs pa ni raṅ bz'in gyis yod pa ñid de | deḥi ḥbras bu rnam par śes pa mthoṅ baḥi phyir ro || bśad par bya ste | gal te deḥi ḥbras bu rnam par śes pa ñid yod na ni mig la sogs pa yod par ḥgyur na srid pa ni ma yin no || ji lta z'e na | de la re z'ig |

=अत्राह । विद्यन्त एव चक्षुरादीनि स्वभावेन । तत्कार्यविज्ञानदर्शनात् । उच्यते । स्याच्चक्षुरादिसद्भावो यदि तत्कार्यं विज्ञानमेव स्यात् । न तु सम्भवति । कथमिति । तत्र तावत्— ।

rkyen ma tshaṅ phyir śes pa ni |
lta baḥi sṅa rol yod ma yin |
ḥon te phyis na śes don med |
gsum pa byed pa don med ḥgyur || 12 ||

In *a* V wrongly *rgyen ma tshad* for *rkyen ma tshaṅ*. In *d* CŚV once *par* for *pa* after *gsum*. V's note on *gsum pa byed pa* is not required at all.

V amitapratyayajñānaṃ dṛṣṭapūrvaṃ na vidyate |
athānte jñānavaiyarthyaṃ darśanaṃ ca nirarthakam || 12 ||

Nothing of it can be accepted. I may offer the following:

ज्ञानं प्रत्ययवैकल्यान्न पूर्वं दर्शनाङ्गवेत् ।
अथ पश्चान्निरर्थं स्यात्तृतीयायां क्रिया तथा ॥१२॥

CŚV: re z'ig lta baḥi sṅa rol du ni mig gi rnam par śes pa yod pa ma yin no | mig gi lta ba bdag poḥi rkyen ma tshaṅ baḥi phyir ro || ci ste lta baḥi ḥog rol du rtog na ni deḥi tshe śes pa don med te | gal te rnam par śes pa med paḥi mig gis gzugs mthoṅ na ni ḥo na rnam par śes pa yoṅs su rtog pa don med do ||

gsum pa byed pa don med ḥgyur

te | rtog pa gsum pa ni lta ba daṅ śes pa gñis cig car ḥbyuṅ ba..[2]

[1] Here in the Tib. text follow two verses and a prose passage quoted from a work or works.

[2] Three letters in X could not be read here.

de la[1].. med do || ḥdi lta bas na lta ba ste byed pa don med par ḥgyur ro || lta ba daṅ śes pa gñis cig car yod na ni rnam par śes pa gaṅ z'ig lta ba daṅ dus mtshuṅs pa la de lta ba la rag las te ḥbyuṅ bar mi rigs so || ba laṅ gi rwa gyas gyon lhan cig ḥbyuṅ ba dag la ni cig śos cig śos la rag las te skye ba ñid mi srid de || de bz'in du lta ba daṅ lhan cig ḥbuyṅ baḥi rnam par śes pa lta ba las rag las te skye ba ñid du ma ḥgyur bas lta ba don med pa kho nar ḥgyur ro ||°

gan gi tshe de ltar rnam par śes pa mi srid pa deḥi tshe de yod pas mig la sogs pa rnams..[2]yod brtag pa gaṅ yin pa de mi rigs so ||

=न तावद्दर्शनात्पूर्वं चक्षुर्विज्ञानं चक्षुषो दर्शनाधिपतिप्रत्ययत्वैकल्यात्। अथ दर्शनात्पश्चात्कल्प्यते। तदा ज्ञानं निरर्थकम्। यदि विना विज्ञानेन चक्षुषा रूपदर्शनं तदा विज्ञानकल्पना निरर्था।

तृतीयायां क्रिया तथा ॥

तृतीया कल्पना ज्ञानदर्शनयोर्ह्येयोर्युगपदुद्भवः...तत्र...न भवति। अनेन दर्शनेन दर्शनक्रिया निरर्था। विज्ञानदर्शनयोः सहभावे विज्ञानं येन दर्शनेन तुल्यकालं तस्य दर्शनस्यायत्तं भवतीति न युक्तम्। सहभूतयोः सव्येतरयो-र्गोविषाणयो[4]रितरदितरायत्तं जायत इति न सम्भवति। तथा च दर्शनेन सहभूतं विज्ञानं दर्शनायत्तं न जायत इति दर्शनं निरर्थमेव।°

यदेवं विज्ञानं न सम्भवति तदा क्व तत्सद्भावेन चक्षुरादीनां...सद्भाव-परीक्षेति न तद्युक्तम् ॥१२॥

313

CSV: [5][अत्राह। न खलु चक्षुः करणरूपम्। किं तर्हि। कारकमेव। तस्य कारकभावाभ्युपगमात्।

[1] Here also three letters are illegible in X.
[2] Here a few letters are illegible in X.
[3] For adhipatipratyaya see MV. pp. 76-77, Poussin's note no. 7, and Visuddhimagga, ed. Bhikkhu A. P. Buddhadattā, Alutgama (Ceylon), 1914, p. 415 : jeṭṭhakaṭṭhena upakārako dhammo adhipatipacayo.° yaṃ yaṃ dhammaṃ garuṃ katvā ye ye dhammā uppajjanti cittacetasikā te te dhammā tesaṃ tesaṃ dhammānaṃ adhipatipaccayena paccayo'ti.
[4] See MV, pp. 139, 224, 547.
[5-5] Not in HPS; Tib. : ḥdir smras pa | mig ni byed paḥi ño bo ma yin pa kho na ste | ḥo no ci z'e na | byed pa po ñid de | de byed pa poḥi dṅos por khas blaṅs paḥi phyir | gsum par byed pa don med ḥgyur | z'es gaṅ smras pa de ni mi rigs so|| de ltar brtags na yaṅ mig lta baḥi bya ba daṅ bral ba ñid du ḥgyur ro|| ji ltar z'e na | gal te mig gis° |

तृतीयायां क्रिया तथा

इति यदुक्तं (312=XIII-12) न तदुक्तम्। एवं कल्पितेऽपि चक्षुर्दर्शन-कार्यविरहितमेव भवेत्। कथमिति चेत्। यदि चक्षू][5] रूपं[1] पश्येद्देशं गत्वा वा पश्येदगत्वा वा पश्ये[2]दुभयथा च[3] दोष इति प्रतिपादयन्नाह—।

mig ni ḥgros daṅ ldan ḥgyur na |
thag riṅ yun riṅ gis mthoṅ ḥgyur |
ha caṅ ñe daṅ ches riṅ du |
gzugs de gsal ba ci ste min || 13 ||

In *b* Vx of CŚV *riṅs* for *riṅ*.

* पश्येच्चक्षुश्चिराद्दूरे गतिमद्यदि तद्भवेत्।
अत्यभ्यासे च दूरे च रूपं व्यक्तं न तच्च किम् ॥ १३ ॥

CŚV: यदि चक्षु:[4] प्राप्तकारित्वाद्विषयदेशं गच्छेत्तदोन्मिषितमात्रेण न चन्द्रतारकादीनर्थान् गृह्णीयात्। [गतिमतोऽर्थदेशोपग्रहणं][5] तुल्यकालं विप्रकृष्ट-विषयग्रहणं [च][6] अयुक्तं[7] गतिकालस्य भिन्नत्वात्। पश्यति च चक्षुरुन्मिषित-मात्रेण [8]समीपस्थवद्दिदूरदेशस्थमपी[8]त्ययुक्तमेतत्। यदि [च][9] प्राप्तकारि चक्षु: स्यात्तदात्यभ्यासेऽपि पश्येदक्षिस्थामञ्जनशलाकां[10] दूरे च व्यक्तदर्शनं स्यात्। न चेतत्सम्भवतीत्ययुक्तमेतत् ॥ १३ ॥[11]

[1] Tib. om. it. Before rūpaṁ HPS has -sthaḥ paśyet.
[2] HPS om. it.
[3] It is not supported by Tib.
[4] Tib. simply mig; HPS cakṣuṣaḥ.
[5] Tib. ḥgro ba daṅ ldan paḥi don gyi (X gyis) yul ñe bar ḥdzin pa daṅ | HPS has here a gap indicating nine letters or syllables.
[6] Here ca is to be inserted as supported also by Tib. reading daṅ. See note 5.
[7] Tib. ma rigs. HPS °viṣyagrahaṇayuktam.
[8-8] Here some words in our X are very indistinct.
[9] HPS; it is supported by Tib. yaṅ, according to which api may preferably be used.
[10] HPS ad. vā.
[11] In this connection the meaning of aprāpta or asamprāpta, (Pali asampatta, as often used) in such words as aprāpta-kārin, etc. is thus given in the VT §286 (VI, 8) : asampattavasenā ti attānam asampattassa gocarassa vasena. attanā visayadesaṃ vā asampattavasena. cakkhusotāni hi rūpasaddehi asampattāni. sayaṃ vā tāni asampattān' eva ārammaṇaṃ gaṇhanti.
The arguments are summarized there thus :
ten'etam vuccati :
cakkhusotam pan'etesu hot'sampattagāhakaṃ |
viññān'uppattihetuttā santarādhikagocare || 1 ||
tathā hi dūradesaṭṭham phalikāditirohitaṃ |
mahantañ ca nagādīnaṃ vaṇṇam cakkhu udikkhati || 2 ||
ākāsādigato kucchicammā'nantarito'pi ca |
mahanto ca ghanādīnaṃ saddo sotassa gocaro || 3 ||
gantvā visayadesantaṃ caritvā gaṇhatīti ce |
adhiṭṭhānavidhāne'pi tassa so gocaro siyā || 4 ||
bhūtappabandhato so ce yāti indriyasannidhiṃ |

314

CŚV: अपि च। यदि चक्षुर्गत्वा रूपं[1] पश्यति तत्किं दृष्ट्वा तद्देशं[2] गच्छत्यदृष्ट्वा।[3] उभयथापि दोष इति प्रतिपादयन्नाह—

gal te gzugs mthoṅ mig ḥgro na |
soṅ bas yon tan ḥgaḥ yaṅ med |
yaṅ na blta byar ḥdod pa ni |
ṅes śes bya ba brdzun par ḥgyur || 14 ||

In *b* V wrongly *pas* for *bas*. In *c* Vx of CŚV *par* or *pa* In *d* Vx of CŚV *ḥdod* for *ṅes*; V and Vx of CŚ *z'es*, and Vx of CŚV *ces* for *śes*; V and Vx of CŚ *brjod* for *brdzun*.

* गतेन न गुणः कश्चिद्रूपं दृष्ट्वाचि यातिचेत्।
द्रष्टव्यं नियमेनेष्टमिति वा जायते हृथा ॥१४॥

CŚV: यदि रूपं दृष्ट्वा रूपदेशं चक्षुर्यातीति कल्प्यते गतेन तेन गमनेन चक्षुषो न किञ्चित्प्रयोजनम्। विषयदर्शनार्थं चक्षुषो गमनम्। स च विषयः[4] पूर्वमेवेहस्थेन दृष्ट इति न किञ्चिद्गमनस्य प्रयोजनम्। अथादृष्ट्वा गच्छति। तदा दिदृक्षितविषयदर्शनं नियमेन न प्राप्नोति। अदृष्ट्वा ह्यन्यस्येवानभिलक्षित-देशगमनादृष्टव्यस्य नियमेन दर्शनं न प्राप्नोति ॥१४॥

315

CŚV: अथैतद्दोषपरिजिहीर्षया यदि—।

mig ma soṅ bar ḥdzin na ni |
ḥgro ba ḥdi kun mthoṅ ḥgyur te |

kammacittojasambhūto vaṇṇo saddo ca cittajo || 5||
na tesaṃ gocarā honti na hi sambhonti te bahi |
vuttā ca avisesena pāṭhe tamvisayā'va te || 6 ||
yadi c'otaṃ dvayaṃ attasamīpaṃ yeva gaṇhati |
akkhivaṇṇam tathā mūlaṃ passeyya pakhumassa ca || 7 ||
disādesavavatthānaṃ saddassa na bhaveyya ca |
siyā ca saddabhedissa sakaṇṇe sarapātanan'ti || 8 ||

In 3c Burmese reading is ghaṇṭā° for ghanā°. In 7*d* pakhumassa is Siamese reading, while in the Ceylone edition referred to it is bhamukassa.

PA (II. 5; pp. 51-60) has a long discussion which begins as follows: idam idānīṃ manāg mīmāṃsāmahe. prāpyakārīṇīndriyāṇy aprāpyakārīṇi veti. tatra prāpyakārīṇy eveti kaṇa-bhakṣākṣapādamīmāṃsakasāṃkhyāḥ samkhyānti. cakṣuḥśrotretarāṇi tāni tatheti tāthā-gatāḥ. cakṣurvarjyānīti tu tathā syādvādāvadātahṛdayāḥ.

AK, I. 43c-*d*: mig daṅ yid daṅ rna ba ni | yul daṅ ma frad | (=aprāptārthāny akṣimanaḥ-śrotrāṇi). See AKB and AKV with Poussin's note, loc. cit.; NS, III. 1. 44 ff.; NK, p. 23.

[1] Tib. gzugs; HPS viṣayam.
[2] Tib. dehi yul du; HPS °kiṃ viṣayaṃ dṛṣṭvā viṣayadeśaṃ for °kim° deśaṃ.
[3] Tib. ad. tataḥ kim (de las cir ḥgyur).
[4] After it Tib. ad. tat (de).

gaṅ la ḥgro ba yod min pa |
de la riṅ med bsgribs paḥaṅ med || 15 ||

In *d* V *ḥdi* for *riṅ*; Vx of CŚV *sgrib*, and V with Vx of CŚ *bsgrib* for *bsgribs*.

* यच्छ्रोत्रादगतं चक्षुः पश्येत्सर्वमिदं जगत् ।
यस्य नास्ति गतिस्तस्य नास्ति दूरं न चाहृतम् ॥ १५ ॥

CŚV: यो हि मन्यते चक्षुः श्रोत्रं[1] मनोऽप्राप्तविषयमित्यागमा[2]दप्राप्तविषयमेव चक्षुरिति तं प्रत्युच्यते । प्राप्तकारितामात्रप्रतिषेधपरत्वादागमस्य तावदविरोधः । क्वचिद्विधेः प्राधान्यं यत्र तस्याविरोधः । क्वचित्प्रतिषेधस्य प्राधान्यं यत्र तदविरोधः[3] । तदत्र विधे[4]रसम्भवात्प्राप्तकारितामात्रप्रतिषेधमात्रेणाप्राप्तविषयत्वं व्यवस्थाप्यते । विधिमुखेन त्वप्राप्तविषयत्वे कल्पप्रमान इहस्थमेव चक्षुः सर्वं जगत्पश्येत् । [5]यस्य हि गतिर्नास्ति तस्य कुतो दूरम् । समीपस्थोऽपि ह्यनेनार्थोऽगत्वा द्रष्टव्यो विदूरस्थो[6]ऽपीति दूरकृतोऽपि विशेषो न स्यात् । यदा चागत्वा पश्यति तदे[7]हस्थमिव विदूरस्थ[8]मपि पश्येत् । गतौ हि सत्यामाहृतौ गति[9]विघातादाहृतं नेच्छत इति युक्तम् । यदा त्वगत्वा द्रष्टव्यं तदाहृतौ गतिप्रतिबन्धाभावादनाहृत इव दर्शनं स्यात् ॥ १५ ॥

316

CŚV: यदि च दर्शनस्वभावं चक्षुः स्यात्तदा स्वभावस्य सर्वत्रैवाव्याघातात् स्वरूपमपि पश्येत् । तथा हि लोके— ।

dṅos po kun gyi raṅ bz'in ni |
daṅ por bdag la snaṅ ḥgyur na |
mig ni mig ñid kyis ḥdzin par |
ci yi phyir na ḥgyur ma yin || 16 |

In *d* Vx of CŚV *gaṅ z'ig gis* for *ci gi phyir*.

* स्वभावः सर्वभावानां पूर्वमात्मनि दृश्यते ।
ग्रहणं चक्षुषः केन चक्षुष्येव न जायते ॥ १६ ॥

[1] HPS °śrotramano°.
[2] AK. I. 43 : aprāptārthāny akṣimanaḥśrotrāṇi (mig daṅ yid daṅ rna ba ni | yul daṅ ma phrad°||).
[3] Tib. de mi ḥgal baḥo ; HPS tadvirodhaḥ.
[4] Tib. vicārasya (rnam par dpyad pa) for vidheḥ.
[5] Tib. ad. evam (ḥdi lta).
[6] So Tib. ; HPS °sthe.
[7] Tib. deḥi tshe ; HPS tad iha°.
[8] Tib. thag riṅ po na gnas pa ; HPS °dūram api.
[9] Tib. om. gati-.

CSV: यथा चम्पकमल्लिकादिषु[1] सौगन्ध्यं पूर्वं स्वाश्रय एवोपलभ्यते पश्चात्तत्सम्पर्कात्तैलादिष्वपि। यथा चाग्नेरौष्ण्यं स्वतोऽवस्थितं[2] तद्योगात् परतो[3]ऽप्युपलभ्यते। एवं यदि चक्षुर्दर्शनस्वभावं[4] स्यात्तदा स्वात्मन्येव तावं[5]द्दर्शनं स्यात्। कस्मात्पुनश्चक्षुषो ग्रहणं चक्षुषैव न भवति। भावानां स्वभावस्य च स्वात्मन्येव प्रथमतरं विद्यमानत्वाच्चक्षुषैव चक्षुषो ग्रहणं न्याय्यम्। न चक्षुः स्वात्मानं पश्यतीति लोष्टादि[6]वत् परदर्शनमप्यस्य न सम्भाव्यते ॥ १६ ॥

317

CSV: यस्तु मन्यते न केवलस्य चक्षुषो रूपदर्शनसामर्थ्यमस्ति। अपि तु तथाणां चक्षूरूपचक्षुर्विज्ञानानां सामग्र्यां सत्यां रूपदर्शनं भवतीति। तदप्यसारम्। यस्मात्—।

mig la rnam śes yod min z'iṅ |
rnam par śes pa lta med la |
gñi ga gzugs la yod min na |
de dag gis gzugs ji ltar mthoṅ || 17 ||

In *b* V and Vx of CŚ *śes la yaṅ blta* for *par śes pa lta*. In *c* V *gñis* for *gñi ga*. In *d* V and Vx of CŚ *gi* for *ji*. In *d* Vx of CŚV *gzuṅs* for *gzugs*.

* चक्षुषोऽस्ति न विज्ञानं विज्ञानस्य न दर्शनम्।
उभयं नास्ति रूपस्य तै रूपं द्रक्ष्यते कथम् ॥ १७ ॥

CSV: चक्षुषस्तावद्विज्ञानं नास्ति। न हि चक्षुर्विषयं जानात्यविज्ञानस्वरूपत्वात्। भौतिकं हि चक्षुः। तस्य जड़त्वाद्विषयबोधो[7] न सम्भाव्यते। एवं

चक्षुषोऽस्ति न विज्ञानम्।

नापि विज्ञानस्य दर्शनमस्ति। [8]विज्ञानं हि विजानाति न तु पश्यति। यदि तु विज्ञानं पश्येत्तदा तस्यापि रूपदर्शनं स्याद्विज्ञानसद्भावात्।[8] रूपस्य तूभयमपि

[1] Tib. campakotpalādikusumānāṃ (me tog tsam pa ka daṅ ut pa la la sogs dag gi).
[2] Tib. raṅ la gnas paḥi; HPS °vyava° for 'va°.
[3] Tib. parātmato° (gz'an gyi bdag ñid la).
[4] Tib. mig blta baḥi raṅ bz'in du; HPS cakṣuṣor darśanasvābhāvyam.
[5] Tib. om. tāvad.
[6] Tib. kharādi° (boṅ bu la sogs). According to Skt. the Tib. reading should have been sa goṅ for boṅ bu.
[7] In X read rtogs for rtog.
[8-8] For vijnānaṁ° -sadbhāvāt Tib. na tad rūpavat. kutas tasya darśanam. tan nāstīti gatavan na paśyati (de ni gzugs can ma yin pa z'ig sto | de la lta ba ga la yod de med pas na soṅ ba ltar mi mthoṅ ṅo ||).

नास्ति। न विज्ञानमनवबोध[1]स्वरूपत्वात्। नापि दर्शनं रूपालोचनाभावात्[2]। यदा चैवमन्योन्यार्थविकलानीन्द्रियविषयविज्ञानानि तदा[3] तत्सामग्र्यामपि सत्यां नैव तै रूपं द्रक्ष्यत [4]इति सम्भावयितुं शक्यम्।[4] रूपदर्शनाङ्गविकलत्वादन्धसमुदायवदित्यभिप्रायः। यदा चैवं रूपस्य दर्शनाभाव[5]स्तदा को नामार्हति तत्त्वविद्रूपं द्रक्ष्यत इति वक्तुं द्रष्टुं वा ॥ १७ ॥

318

CŚV: यथा च तत्त्वविन्ना[6]र्हति रूपं द्रष्टुमेवं शब्दमपि श्रोतुं नार्हति। रूपदर्शनवच्छब्दश्रवणस्याप्यसम्भवात्।[7] इह यदि शब्दः श्रूयते स श्रवणदेशं सम्प्राप्तो वा श्रूयेतासम्प्राप्तो[8] वा। यदि तावत्सम्प्राप्तः श्रूयते स श्रवणदेशं व्रजञ्छब्दं कुर्वाणो व्रजति[9] निःशब्दो वा। तत्र यदि पूर्वः कल्पस्तदा—

gal te smra z'iṅ sgra ḥgro na |
gaṅ gis smra ba por mi ḥgyur |
ḥon te mi smra bar ḥgro naḥaṅ |
gaṅ gis de la śes pa skye || 18 ||

In *d* V and Vx of CŚ *bskyed* for *skye*.

* न वक्ता जायते केन शब्दो याति ब्रुवन् यदि।
अथ यात्यब्रुवंस्तस्मिन् प्रत्ययः केन जायते ॥१८॥

CŚV: ततश्च वक्तृत्वाद्देवदत्तवच्छब्दोऽसौ[10] न भवति। अथाब्रुवन् याति तदा तस्मिञ्छब्दे निःशब्दे व्रजति शब्दोऽयमिति कस्यावसायो भवेत्। न चागृहीतस्यास्यास्तित्वमिति न युक्तमेतत् ॥ १८ ॥

319

CŚV: किञ्चान्यत्—।

gal te phrad de sgra ḥdzin na |
sgra yi daṅ po gaṅ gis ḥdzin |
sgra ni rkyaṅ baḥaṅ mi ḥoṅ na |
riṅ bu ji ltar ḥdzin par ḥgyur || 19 ||

1 Tib. rtogs (X rtog) paḥi raṅ bz'in ma yin paḥi phyir. HPS °jñānm avabodha°.
2 Tib. adarśanātmakatvāt (ita ba ma yin paḥi bdag ñid can yin paḥi phyir).
3 Tib. om. it.
4.4 Tib. om. iti° śakyam.
5 Tib. gzugs la lta ba med pa ; HPS rūpasyādarśanāsambhavāt.
6 In X read rig (=vid) for rigs.
7 Tib. med paḥi phyir (abhāvāt).
8 In Tib. a- (ma) of asamprāpataḥ is left out.
9 Tib. ḥgro ba ; HPS vrajan.
10 Tib. om. asau.

In *a* Vx of CSV *te* for *de*. In *c* V wrongly *rgyad* for *rkyaṅ* and V and Vx of CS *par* for *baḥaṅ*. In *d* V wrongly *reṅ* for *riṅ*.

* प्राप्तश्चेद्गृह्यते शब्दः तस्यादिः केन गृह्यते।
न चेति केवलः शब्दो गृह्यते केवलः कथम् ॥ १९ ॥

CSV: यदि श्रोत्रेन्द्रियस्यानं प्राप्तः शब्दो गृह्यते तस्यादिः केन गृह्यते।[1] प्राप्तग्राहित्वाच्छोत्रस्य शब्दस्यादेर्ग्रहणं नास्ति। न चान्यदिन्द्रियं तस्य ग्राहकं सम्भवतीति[2] नैव केनचिदस्यादि[3]र्गृह्यते। ततश्चागृह्यमाणत्वाच्छब्द एवासौ न[4] भवतीत्यभिप्रायः। [5]नवद्रव्यकत्वाच्च [6]परमाणोर्

न चेति केवलः शब्दः।

भवता च शब्दमात्रमेव श्रोत्रेण गृह्यते न गन्धादय इति न युज्यते। यद्वा[7] शब्दस्याग्रहणमस्तु। यद्वा[8] गन्धादयोऽपि गृह्यन्ताम्। न चैतदेवमिति न प्राप्तविषयत्वं शब्दस्य ॥ १९ ॥

320

CSV: अथ यदेतदुक्तं

प्राप्तश्चेद्गृह्यते शब्दस्तस्यादिः केन गृह्यते। इति।

यदि तस्यादिर्न गृह्येतस्तदा को दोष इति। अयं दोषो यदस्य शब्दत्वमेव विशीर्यते। तथा हि—।

ji srid sgra thos ma gyur pa |
de yi bar du sgrar mi ḥgyur |
sgra med pa yaṅ mthar sgra ñid |
ḥgyur na de ni mi rigs so || 20 ||

In *a* V *ba* for *pa*.

* यावन्न श्रूयते शब्दस्तावच्छब्दो न जायते।
अशब्दस्यापि शब्दत्वमन्ते तच्च न युज्यते ॥ २० ॥

CSV: यो न श्रूयते सोऽश्रूयमाणत्वान्नभ्रादिवच्छब्द एव न भवति। अथ मन्यसे यदा श्रूयते तदा शब्दो भविष्यतीति। एतदप्यसम्भाव्यम्। न हि

[1] Tib. dehi daṅ po gaṅ gis ḥdzin ; HPS om. tasyā° te.
[2] For sambhava° Tib. bhava° (yin pas). [3] In X read daṅ po for dbaṅ po.
[4] Tib. °ścāgṛhīto'rtho'sau śabda eva na° (dehi phyir ma bzuṅ baḥi don de ni sgra ñid du mi ḥgyur ro).
[5] Tib. ad. evam (de ltar), and -dravyātmakatvāt (bdag ñid) for -dravyakatvāt.
[6] HPS ad. śabda-.
[7] Tib. ekadhā (rnam pa geig tu), and ad. śrotreṇa (rna).
[8] Tib. yaṅ na, translated by atha vā.

गन्धादेः पश्चाच्छब्दत्वं दृष्टम्। तद्देवास्याप्यशब्दस्य[1] पश्चाच्छब्दत्वमयुक्तमिति ॥[2] २० ॥

321

CSV: एवं तावदिन्द्रियाणां विषयग्रहणासामर्थ्यमुद्भाव्य मनसोऽपि विषयग्रहणासामर्थ्यमुद्भावयन्नाह— ।

dbaṅ po rnams daṅ bral sems kyis |
soṅ steḥaṅ ci z'ig byed par ḥgyur |
de ltar yin daṅ srog ḥdi ni |
rtag tu yid med ci ste min || 21 ||

V and Vx of CŚ *kyaṅ* for *daṅ*, and *kyi* for *kyis* in *a*, and *lta* for *ltar* in *c*.

* वियुक्तमिन्द्रियैश्चित्तं किं गत्वापि करिष्यति ।
एवं सतीह जीवोऽयमनस्कः सदा न किम् ॥ २१ ॥

CSV: यदि चित्तं विषयदेशं गत्वा विषयं परिच्छिनत्तीति कल्प्यते तदयुक्तम्। इहेदं चित्तमिन्द्रियसहितं वा विषयदेशं गच्छेत्केवलं वा। न तावदिन्द्रियसहितं याति। इन्द्रियाणां देह एव सदा सन्निधानात्। गमने च सति देहस्य निरिन्द्रियत्वप्रसङ्गात्। अथ केवलं गच्छति तदापि

वियुक्तमिन्द्रियैश्चित्तं किं गत्वापि करिष्यति ।

न हि चक्षुरादीन्द्रियव्यतिरिक्तस्यास्य रूपादिदर्शनसामर्थ्यमस्ति। अन्धादीनामपि दर्शनादिसद्भावप्रसङ्गात्। अथापि कथञ्चिद्विषयदेशगमनेनार्थोपलब्धिरस्य परिकल्प्यते तदाप्यर्थबोधापर्यवसानत्वादनिवृत्तिः[3]।

एवं सतीह जीवोऽयममनस्कः सदा न किम् ॥

अचिन्तक एवात्मा सर्वकालं प्राप्नोति। न चाचिन्तकस्यात्मत्वं[4] सम्भावयितुं युक्तम्। स्तम्भा[5]दीनामप्यात्मत्वप्रसङ्गात्।[6]

तदेवं युक्त्या विचार्यमाणानामिन्द्रिय[विषयविज्ञानानां सद्रूपा][7]सम्भवात्[8] स्वरूपसिद्धिरसती। यदि ह्येषां स्वरूपसिद्धिः स्यात्तदोपपत्त्या विचार्यमाणा

[1] Tib. sgra med pa ; HPS śabdasya for aśabdasya.
[2] Here in Tib. follows a passage not to be found in Skt. of HPS.
[3] Tib. don rtogs pa mthar thug pa med paḥi phyir mi ldog par ḥgyur ro || HPS tadāpy aparyyavasānatvād arthabodhasyānivṛttau satyām.
[4] Tib. bdag ñid ; HPS °ātmakatvam.
[5] After stambha in Tib. there is one word more which could not be read in X.
[6] Tib. bdag ñid du thal bar ḥgyur baḥi phyir ro || HPS stambhādivad acintakatvāt.
[7] HPS has here a lacuna ; Tib. yul daṅ rnam pa śes pa rnams la yod paḥi ṅo bo |
[8] Tib. abhāvāt (med pas).

यथास्थितेन स्वरूपेण स्फुटतरमुपलभ्यरन्। न चोपलभ्यन्ते। तस्मात्स्वरूपशून्या इति सिद्धम् ॥ २१ ॥

322

CSV: यदि तर्ह्येषां स्वभावो नाम[1] नास्ति तत्कथमेषां[2] विशेषपरिच्छेदात्मिका संज्ञा [3]विशेषव्यवस्थाहेतुत्वेनोपदिश्यते। उच्यते। सत्सु पदार्थेषु तद्विशेषपरिच्छेदात्मिका संज्ञा स्यात्[4]। यदा[5] तेषां[6] पदार्थानामसत्त्वं प्र[तिपाद्यते तदा तद्वारा कृतः][7] स्वरूपसिद्धिः स्यात्। किं त्वत्रैव विषयपरिच्छेदः सर्वथा नास्ति। न नास्तीति। निःस्वभावस्य भावस्य[8] विद्यमानत्वात्। तथा हि—।

sṅar mthoṅ ba yi don gaṅ z'ig |
yid kyis smig rgyu ltar ḥdzin pa |
de ni chos kun rnam bz'ag la |
ḥdu śes phuṅ po z'es bya ḥo || 22 ||

In *c* V and Vx of CŚ *gz'ag* for *bz'ag*.

* मनसा गृह्यते योऽर्थः पूर्वदृष्टो मरीचिवत्।
सर्वधर्मव्यवस्थासु स संज्ञास्कन्धसंज्ञकः ॥ २२ ॥

CSV: इह चक्षुः प्रतीत्य रूपञ्च चक्षुर्विज्ञानमुत्पद्य निरुध्यमानं सहेन्द्रियविषयैर्निरुध्यते। तस्मिन्निरुद्धे पूर्वदृष्टो[9] योऽर्थः स एव पश्चान्मनसा गृह्यते। कथं पुनरसन्निहितस्य ग्रहणं सम्भाव्यत इत्याह [मरीचिवदिति। यद्यपि नाल्पमात्रमपि मरी][10]चिकायां जलमस्ति अपि च हेतुप्रत्ययवशात् प्रवर्तत एव जलाकारसंज्ञा एवमविद्यमानस्वरूपेऽपि पूर्व[11]गृहीतेऽर्थे मरीच्यामिव यद्[12] विज्ञानमुत्पद्यते तत्सर्वधर्मव्यवस्थाकारणम्। सर्वधर्मव्यवस्थाकारणत्वाच्च स एव संज्ञास्कन्ध इत्युक्तस्तथाविधसंज्ञाविशेषसम्प्रयोगात्। संज्ञावशेन च सर्वधर्मव्यवस्था विज्ञातव्या न पुनः पदार्थस्वरूपनिबन्धना स्वभावस्य सर्वथायुज्यमानत्वात् ॥२२॥

[1] Tib. om. it as well as tarhi after yadi.
[2] Tib. de rnams kyi; HPS eṣā.
[3] HPS ad. padārtha-.
[4] Tib. yuktā (rigs) for syāt.
[5] Tib. gaṅ gi tshe; HPS om. it.
[6] HPS ad. ca.
[7] HPS has a lacuna; Tib. bstan pa dehi tshe de rnams kyi sgo nas ḥdug° ga la ḥgyur |
[8] Tib. raṅ bz'in med paḥi dṅos po yod paḥi phyir | HPS svabhāvasya vidya° for nihsva° bhavasya vidya°.
[9] Tib. sṅar mthoṅ baḥi; HPS pūrvavaddṛṣto.
[10] HPS marks here a lacuna. Tib. smig rgyu ltar z'es bya ba smros śe smig rgyu la chu bag tsam kyaṅ med med kyi |
[11] Tib. om. pūrva-.
[12] HPS ad. here vikalpakam.

323

CŚV: यद्येवमस्ति तर्हि स्वभावतः संज्ञास्कन्धः। न हि तस्मिन्नसति[1] सर्वधर्मव्यवस्था शक्या कर्तुमिति। उच्यते। सापि हि संज्ञा विज्ञानसम्प्रयुक्तत्वाद् विज्ञानव्यतिरेकेण[2]सती। तदपि च विज्ञानं संज्ञाव्यतिरेकेण[2]सिद्धत्वात् स्वरूपतो नास्ति। इतोऽपि नास्ति।[3] यस्मात्—।

mig dañ gzugs la brten nas yid |
sgyu ma bz'in du skye bar ḥgyur |
gaṅ la yod pa ñid yod de |
sgyu ma z'es byar mi rigs so || 23 ||

* चक्षुः प्रतीत्य रूपञ्च मायावज्जायते मनः।
विद्यते यस्य सद्भावः सा मायेति न युज्यते ॥२३॥

CŚV: न हि तद्विज्ञानमुत्पादाभ्यागस्ति यदुत्पत्तिक्रियाश्रयत्वेन प्रवर्तेत। सत्स्वपि चक्षुरादिषु प्रत्ययेषु विज्ञानस्य स्वरूपासम्भवात्[4]। उत्पत्तिक्रियाया अप्रवृत्तेरुत्पादो न युज्यते। उत्पद्यते चेतद्विज्ञानमित्यतः किं निश्चेतुं पार्यतेऽन्यत्र मायाधर्मतायाः। उक्तं हि[5] भगवता—

तद्यथा भिक्षवो मायाकारो वा मायाकारान्तेवासी [वा] चतुर्महापथे विविधं मायाकर्म विदर्शयेत्। तद्यथा हस्तिकायमश्वकायं[6] रथकायं पत्ति[7]कायं च[8]। तं चक्षुष्मान् पुरुषः पश्येन्निध्यायेद्योनिशश्चोपपरीक्षेत। तस्य तं पश्यतो निध्यायतो योनिशश्चोपपरीक्षमाणस्यासत्तो[9]ऽप्यस्य ख्यायाद्रिक्ततोऽपि तुच्छतोऽप्यसारतोऽपि। तत्कस्य हेतोः। किमस्मिन् मायाकृते सारमस्तीति। एवमेव भिक्षवो[10] यत्किञ्चिद्विज्ञान[11]मतीतानागतप्रत्युत्पन्नमाध्यात्मिकं वा बाह्यं वौदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यद्वा दूरे यद्वात्यन्तिके तद्भिक्षुः पश्येन्निध्यायेद्योनिशश्चोपपरीक्षेत। [12]तत्पश्यतो निध्यायतो योनिशश्चोपपरीक्ष-

[1] Tib. tataḥ (de bas na ni) for tasminn asati.
[2] In X read ma gtogs for ma rtogs.
[3] Tib. ḥdi las kyaṅ [ma] yin te; HPS om. it.
[4] Tib. -abhāvat (med par) for -asmbhabāt. See p. 195, note 4.
[5] Tib. ad. vistaraśaḥ (rgya cher) 'copiously.'
[6] Tib. rtaḥi tshogs daṅ; HPS om. aśva°.
[7] This word, patti-, could not be verified as the X is very illegible here.
[8] Tib. daṅ; HPS om. ca. Tib. ad. iti bahu (?) śatam jāyate (z'es brgya cher ḥbyuṅ z'iṅ).
[9] This should be the actual form. asattaḥ=asat-taḥ. HPS asataḥ; Tib. yod pa ma yin par. See p. 195, l. 1.
[10] Tib. dge sloṅ dag; HPS om. it.
[11] Tib. ad. ucitam (ruṅ bar).
[12] Tib. om. it.

माणस्यासत्तो[1]ऽप्यस्य ख्यायाद्रिक्ततोऽपि तुच्छतोऽप्यसारतोऽपि रोगतो[2]ऽपि गण्डतो[3]ऽपि शल्यतोऽप्यघतोऽप्यनित्यतोऽपि दुःखतोऽपि शून्यतोऽप्यनात्मतोऽप्यस्य ख्यायात्। तत्कस्य हेतोः। किमस्मिन् विज्ञानस्कन्धे सारमस्तीति।

यथोपलभ्यते विचार्यमाणस्य तथा स्वरूपासम्भवा[4]न्मायायुवति[5]प्रख्यं विज्ञानमिति शक्यमवसातुम्। ततश्च सूक्तमेव तत्

चक्षुः प्रतीत्य रूपञ्च मायावज्जायते मनः। इति।

यदि पुनरस्य स्वरूपं स्यात्तदा स्वरूपतो

विद्यते यस्य सद्भावः सा मायेति न युज्यते॥

न हि[6] लोके स्वभावादशून्या सङ्गता[7] स्त्री मायेति युज्यते। एवं विज्ञानमपि स्वरूपतो विद्यमानत्वान्मायोपमं न स्यात्। उपदिश्यते च मायोपमं विज्ञानम्। अतो निःस्वभावं विज्ञानम्। यदा च निःस्वभावं विज्ञानं तदा निःस्वभावविज्ञानसम्प्रयुक्ता संज्ञा निःस्वभावेति स्थितम्[8]॥ २३॥

324

CSV: अत्राह। आश्चर्यमेतत्। न चेन्द्रियाणां कथमपि विषयग्रहणं सम्भाव्यते उत्पद्यते[च]चक्षुः प्रतीत्य रूपाणि च विज्ञानमिति। उच्यते। किमेतदेवाश्चर्यं त्वया दृष्टम्[9]। इदं किं नाश्चर्यं यत्र निरुद्धान्निरुद्धाद्[10] बीजादङ्कुरोदयो युज्यते। उत्पद्यते च बीजं प्रतीत्याङ्कुरः। तथा कृतस्योपचितस्य कर्मणो निरुद्धस्य न क्वचिदवस्थानं सम्भवति।[11] [12]कल्पशतसहस्रा[13]न्तरितनिरोधादपि कर्मणः सात्म्या[14]दुत्पद्यत एव फलम्। घटादयश्च स्वकारणात् तत्त्वान्यत्वेन[15] विचार्यमाणा न सम्भवन्ति।[16] तथाप्युपादाय प्रज्ञप्त्या मधूदकादीनां[17] सन्धारणाहरणादिक्रियानिष्पादन[18]योग्या भवन्ति। तदेवम्—।

[1] See p. 194, note 9.
[2] In X read nad for nas.
[3] Tib. ḥbras. See MVt (Chinese-Sanskit-Tibetan Vocabulary) 9487.
[4] Tib. -abhāvāt (med paḥi phyir). See p. 194, note 4.
[5] In X add ma after na chuṅ. See MV, p. 46. [6] Tib. ad. pūrvavat.
[7] Tib. mi stoṅ ẓiṅ yod par ḥgyur baḥi; HPS śūnyā sambhūtī.
[8] Here in Tib. follow four verses quoted from some work the introductory line being uktaṃ hi bhagavatā (bcom ldan ḥdas kyis° gsuṅs so ||). HPS om. them.
[9] Tib. om. tvayā dṛṣṭam.
[10] Tib. anirudhyamānād for aniruddhād (ḥgag bz'in paḥi).
[11] For kṛtasya° sambhavati Tib. kṛtam upacitam karma nirudhyāticiram prāptam na kvacid avatiṣṭhate (byas śiṅ bsags paḥi las ḥgags nas yun śiṅ tu riṅ por lon pa la ḥgaḥ yaṅ gnas pa med mod kyi||). [12] Tib. ad. kintu (ḥon kyaṅ).
[13] For kalpaśatasahasra- Tib. anekakalpa- (bskal pa du mas).
[14] Tib. vastutaḥ (dṅos su). [15] Tib. ad. vividham (rnam pa ltar).
[16] For na sambhavanti Tib. na bhavanti (yod pa ma yin mod).
[17] Tib. °dakadugdhānāṃ (ḥo ma). [18] Tib. om. -niṣpādana-.

gaṅ tshe mkhas la sa steṅ na |
ṅo mtshar can min can med pa |
de tshe dbaṅ rtogs de ḥdra la |
ya mtshan z'es bya ci z'ig yod || 24 ||

* यदा न किञ्चिदाश्चर्यं विदुषां विद्यते भुवि ।
इन्द्रियाणां गतावेवं तदा को नाम विस्मयः ॥ २४ ॥

CSV: कार्यं हि स्वकारणमनुविदधद्दृश्यते । यथा[1] गोर्गौरश्वादश्वः शालेः शालिरित्यादि[2] । भूतानां रूपशब्दादीनां च विधिरेष न दृश्यते[3] । तथा हि । कायेन्द्रियग्राह्यत्वान्महाभूतान्य[4]श्रावणानि । तेभ्यश्चाक्षुषं रूपं श्रावणः शब्द उत्पद्यत इति । परमेतदाश्चर्यम् । एवं घ्राणादिविषये चक्षुरादिषु च योज्यम् । अथ वा नैवेयमिन्द्रियाणामर्थगतिर्विस्मयकारणम् । यदि ह्यैन्द्रियाणामेव केवलमर्थगता[5]वेतद्धैचित्र्यं स्यात्तदेतद्विस्मयस्थानम् । यदा तु सर्वमेव यथोदितेन न्यायेन जग[6]द्विदुषां विस्मयकरमिन्द्रजालमिव तदा नेदमाश्चर्यम् । प्रदेशवृत्ति हि किञ्चिदसम्भावनीयमुपलभ्यमानं विस्मयकरं जायते न सर्वत्रैव तुल्यरूपम् । न ह्यग्नेरौष्ण्यं विस्मयायेति ॥ २४ ॥

325

CSV: अत एवानियतस्वरूपत्वाद्यथाप्रत्ययं तथा तथा विपरिवर्तमानत्वाद्विदुषाम्— ।

mgal meḥi ḥkhor lo sprul pa daṅ |
rmi lam sgyu ma chu zla daṅ |
khug sna naṅ gi brag cha daṅ |
smig rgyu sprin daṅ mtshuṅ srid pa || 25 ||

rnal ḥbyor spyod pa bz'i brgya pa las dban po dan don dgag pa bsgom pa bstan pa ste | rab tu byed pa bcu gsum paḥo||

In *a* V *ba* for *pa*. In *c* Vx of CSV *khu rna* for *khug sna*; V wrongly *grug* for *brag*; and V with Vx of CS *ca* for *cha*. In *d* all *srid pa mtshuṅs* for *mtshuṅs srid pa*.

1 Tib. dper na; HPS om. it.
2 Tib. la sogs pa lta bu yin na; HPS °ityādīnām bhu°.
3 Tib. yujyate (rigs so).
4 Before aśrāvaṇāni HPS ad. acākṣuṣāṇi.
5 For -gatau Tib. dam pa (=sat) which does not give any suitable sense. One may read here rtogs as before.
6 In X for grol read ḥgro.

* अलातचक्रनिर्माणस्वप्नमायाम्बुचन्द्रकैः ।
धूमिकान्तःप्रतिश्रुत्कामरीच्यभ्रैः समो भवः ॥ २५ ॥

॥ योगाचारे चतुःशतक इन्द्रियार्थभावनासन्दर्शनं नाम त्रयोदशं प्रकरणम् ॥ १३ ॥

CSV: यथा सञ्चलन[1]स्नेन्धनस्याग्निभ्राम्यमाणस्य तद्गतदर्शनविपर्यास-निबन्धनत्वाच्चक्राकारोपलब्धिर्भवति। न च तत्रास्ति चक्रस्वरूपलेशोऽपि। यथा च [2][निर्मिताः समाधिप्रत्ययसम्भूताः स्त्रियः सङ्भूताः स्त्रिय इव कामिनां संक्लेशहेतुर्भवन्ति। मुनिभिर्निर्माणसमाधिबलेना निर्मितमुनिस्वरूपाः सङ्भूतमुनिस्वभावरहिता [अपि] सङ्भूता मुनय इव सत्त्वानामशेषजन्ममनोऽन्धकारो-न्मूलनेन स्वर्गापवर्गमार्गहेतुर्भवन्ति।][2] ते तु चित्तचैत्तेन्द्रिय[3]रहितत्वान्न सङ्भूताः[4]। यथा च निद्रा[5]सम्प्रयुक्तविज्ञानसमायुक्तात्मभावप्रत्ययः स्वप्नात्मभावो जाग्रदात्मभाव इवात्मनि स्नेहविपर्यासनिबन्धनः। स चासङ्भूतः प्रबुद्धस्य तथा दर्शनाभावात्। यथा च मायाकारयन्त्रनिबन्धना मायाकृतयुवतयस्तत्स्वरूपानभिज्ञानां[6] चित्तमोहनपरा एव सङ्भूतस्त्रीशून्या जायन्ते। यथा च जलचन्द्रः सङ्भूतचन्द्रशून्यः प्रतीत्यसमुत्पादबलात्तथोत्पद्यमानश्चन्द्रविपर्यासनिबन्धनो भवति बालानाम्। यथा च प्रतीत्यसमुत्पादबलादेव तथाविधकालदेशनिमित्तानि प्रतीत्य धूमिका जाता विदूरस्थानां सङ्भूतधूमविपर्यासनिबन्धना भवति। यथा च गिरिगह्वर[7]कन्दरा[8]दीना[9]मन्तः प्रतिश्रुत्का प्रतीत्य[10] जायमाना सङ्भूतशब्दाभिमानं जनयति जनानाम्[11]। यथा च मरीचिका देशकालविशेषसन्निहितादित्यरश्मि-प्रत्यया[12] जलस्वरूपविविक्ता विदूरस्थानां जलविपर्यासं जनयति। यथा चाभ्राणि

[1] Tib. me daṅ bcas paḥi ; HPS sajalasya.
[2-2] Tib. sprul paḥi tiṅ ṅe ḥdzin gyi rkyen las byuṅ baḥi bud med dag yod par ḥgyur baḥi bud med rnams ltar ḥdod chags can rnams la kun nas ñon moṅs paḥi rgyur ḥgyur z'iṅ‖ thub pa rnams kyis sprul paḥi tiṅ ṅe ḥdzin gyi stobs kyis sprul paḥi thub paḥi raṅ gi ño bo med ciṅ yod par gyur paḥi thub paḥi raṅ bz'in daṅ bral ba rnams bden par gyur paḥi thub pa dag ltar skye ba ma lus paḥi yid kyi mun pa ḥjoms pa na sems can rnams kyi mtho ris daṅ byaṅ grol gyi lam gyi rgyur ḥgyur la ‖ HPS nirmāṇāni samādhiviśeṣapratyayasamudbhū-tāni vicitrakriyāviśeṣaniṣpādanāt sadbhūtayogisamjñādarśanamanoviparyāsād utpādayanti.
[3] Tib. om. -indriya-.
[4] HPS ad. yoginām.
[5] Or svapna-, Tib. gñid ; HPS siddha-.
[6] For kyis in rnam par mi śes pa rnams kyis in X read kyi.
[7] Tib. tshaṅ tshiṅ (gahana).
[8] Tib. kandaradarī (ri khrod kyi sul daṅ).
[9] Tib. rluṅ gi zab rnams kyi (=vātagambhīrāṇām ?). For girī° dīnām HPS girighvarodarādīnām.
[10] Tib. om. it.
[11] Tib. skye bo rnams la ; HPS aviduṣām.
[12] For pratyaya Tib. in X rten for which read rkyen.

विदूरतः पर्वताद्याकारं विपर्यासमुपजनयन्ति। एवमविदुषां[1] यथाबत्प्रतीत्य-समुत्पादस्वभावाकुशलानामविद्याविपर्यासाक्षिप्तकर्मप्रत्ययो विज्ञानादिजन्म-संसारः[2] सह बाह्येन भाजनेन[3] [जायमानोऽलातचक्रादिव][4] मृषामोषधर्मकः स्वभावशून्य एव सन् बालजनविसंवादकः प्रतिभाति। विदितधर्मस्वभावाश्च सर्वत्रैव सङ्परि[क्षयाद्विमुक्तिमाश्रिता][5]भवन्तीति स्थितमेतदलातचक्रादिव-न्निःस्वभावः संसार इति ॥[6]२५॥[7]

[1] In X add mi before mkhas.
[2] Tib. hkhor ba (ḥkhor ba rnam par śes pa la sogs paḥi skye ba); HPS °janmasāgaraḥ.
[3] Tib. phyi rol gyi snod daṅ beas par; HPS sa bāhyena°.
[4] Tib. skye bz'in pa mgal meḥi ḥkhor lo la sogs pa ltar. HPS has a lacuna here.
[5] Tib. zad pas rnam par grol ba la brten par.
[6] The Skt. text as in HPS ends here, but in Tib. follows here a long passage.
[7] The Kārikā is quoted in MV, pp. 173, 552.

Cf. (i) māyāmaricisvapnodakacandrapratiśrutkāpratibhāsopamasarvadharmanayāvatiṛṇaḥ. LV, X, p. 181.

(ii) pratibhāsabimbamāyābhra'maricyā supiaona tu | alātacakragandharvapratiśrutkāsamodbhavāḥ || LA, 1X, 173.

(iii) gandharvanagarasvapnamāyānirmāṇasādṛśāḥ | Op. cit. X, 144. See MV, pp. 334, 419.

[1] In (ii) the printed text reads ° māyābha° for māyābhra°.

Chapter XIV

MATHAR ḤDZIN PA DGAG PA BSGOM PA BSTAN PA

अन्तग्राह्यप्रतिषेधभावनासन्दर्शनम्

326

CSV : अत्राह। यदि प्रतीत्यसमुत्पन्नत्वादलातचक्रा[1]दिवन्निःस्वभावो भवः कस्य तर्ह्येदानी[2] स्वभावोऽस्तु। न कस्यचित्पदार्थस्य स्वभावः शक्यः कल्पयितुम्। तथाविधस्य पदार्थस्य सर्वथानुपलभ्यमानत्वात्। तथा हि—।

dṅos po gaṅ z'ig gz'an ḥgah laḥaṅ |
rag las pa z'ig mi ḥgyur na |
deḥi bdag ñid ḥgrub ḥgyur na |
de ni gaṅ laḥaṅ yod ma yin‖ 1 ‖

In *b* V *lus* for *las*; V and Vx of CS *pa ni* for *pa z'ig*, and *naḥaṅ* for *laḥaṅ* in *d*.

* आयत्तं यस्य भावस्य भवेन्नान्यत्र कुत्रचित्।
सिध्येत्तस्यास्थिता नाम क्वचित्स च न विद्यते ॥ ६ ॥

CSV : यदि हि कस्यचित्पदार्थस्य निष्पत्तौ क्वचिल्किञ्चिदायत्तं न स्यात्तदास्यापरायत्तस्य[3] स्वतन्त्रस्य सत एव व्यवस्थितत्वात्स्वभावतोऽस्तित्वं कल्पयितुं युक्तम्। न त्वेष सम्भवोऽस्ति यद्धेतुप्रत्ययजन्मनां परायत्तता न स्यात्। अहेतुको वा पदार्थः कश्चिल्लभ्यवेदिति। यतश्चैवं निर्हेतुक [-त्व-][4] प्रसङ्गात् कस्यचित्[5]पदार्थस्य क्वचित्स्वरूपं नास्ति तस्मान्नास्ति कस्यचित्स्वभावः। स्वभावाभाच्चालातचक्रादि[6]वन्नास्ति स्वभावसिद्धि[7]रिति स्थितम् ॥१॥

327

CSV : यदि चामी पदार्था अलातचक्रादि[8]वद् विसंवादका[9] इत्यवस्तुका न स्युस्तदा नियतमुपपत्त्या विचार्यमाणा जातरूपादिवत्सुष्टतर-

[1] Before -adi° Tib. ad. -nirmāṇasvapna- (sprul pa daṅ rmi lam).
[2] Tib. om. idānīm.
[3] Tib. ad. bhāvasya (dṅos po).
[4] Literally Tib., too, has no -tva- (ñid), but it is to be supplied as HPS has done.
[5] In X read ḥgah z'ig for ḥgaḥi rin (?).
[6] Tib. ḥkhor lo la sogs; HPS om. -ādi-.
[7] According to Tib. the compound is to be explained as svabhāvena siddhiḥ (raṅ bz'iin gyis grub pa). One may, however, read gyi for gyis.
[8] Before -ādi- Tib. ad. -nirmāṇa- (sprul pa).
[9] Tib. bslu baɜ; HPS vaisaṃvādakā visaṃvādakatvād avastukā.

सुपलभ्यमानस्वरूपाः स्युः। न चैते विचाराग्निसंतापिता विपर्यास[1]निबन्धनत्वात् स्वरूपाभावं नासादयन्ति। न हि वस्तूपपत्तिरहितं[2] युज्यते[3]। सर्वथा तस्य विसंवादकत्वात्[4]। अत एवाचार्यो वस्तुभिनिवेशग्रन्थिविलोकरणायातः परं[5] यथा च घटादीनां स्वरूपं न सम्भवति तथोपपत्तिमाह—।

gzugs ñid bum z'es gcig ma yin |
gzugs ldan bum gz'an yod min pa |
bum pa la gzugs yod min z'iṅ |
gzugs la bum pa yod ma yin ‖2‖

* रूपमेव घटो नैक्यं घटो नान्योऽस्ति रूपवान्।
न विद्यते घटे रूपं न रूपे विद्यते घटः ॥२॥

CSV: इह यदि घटो नाम कश्चित्पदार्थः स्यात्[6] दर्शनेन्द्रियग्राह्यत्वाद्रूपाङ्गेन वा परिकल्पितोऽभेदेन[7] वा। तत्र तावद्

रूपमेव घटो नैक्यम्।

न यदेव रूपं स एव घट इति रूपघटयोरैक्यं न भवति[8]। यदि हि रूपघटयोरैक्यं स्यात्तदा यत्र यत्र रूपं तत्र तत्र [घट इ][9]ति सर्वत्रैव रूपे घटः स्यात्। पाकजगुणोत्पत्तौ रूपविनाशे घटविनाशः स्यात्। न चैतत् सम्भवतीति रूपमेव घट इति नास्त्येकत्वम्। अथैतद्दोषपरिजिहीर्षया रूपादन्यो घटो रूपवान् परिकल्प्येत तद्यथार्थान्तरभूतैर्गोभिर्गोमान् देवदत्त इति। एतदप्ययुक्तम्। यस्माद्[10]

घटो नान्योऽस्ति रूपवान्।

यदि रूपादन्यो घटः स्यात्[11] रूपनिरपेक्षो[12] गृह्येत। न हि गोभ्यो व्यतिरिक्तो देवदत्तो गोव्यतिरेकेण न गृह्यते। तद्वद्घटोऽपि रूपनिरपेक्षो गृह्येत। न च गृह्यत इत्यतो रूपव्यतिरिक्तो घटो नास्ति। यदा च नास्ति कथमविद्यमान[13]स्तद्वत्तया गृह्यते। न ह्यविद्यमानो वन्ध्यातनयो गोमानिति

[1] Tib. ad. -mātra- (tsam) after viparyāsa-.
[2] Tib. dṅos po ni ḥthad pa daṅ bral ba ma yin te | HPS ° vastūpapattyāpi.
[3] Tib. om. it.
[4] Tib. avisaṃvādaktvāt (mi bslu ba ñid yin paḥi phyir).
[5] In X read chad for ched.
[6] In X read de for da.
[7] In X add tha between mi and dad.
[8] Tib. sambhavati (srid).
[9] HPS; and it is supported by Tib. (bum paḥo z'es).
[10] Tib. tathā hi (ḥdi ltar).
[11] Tib. de; HPS svarūpa°.
[12] In X read bltos or ltos for rtog.
[13] Tib. yod pa ma yin pa; HPS asaṃvidyamāna°.

व्यपदिश्यते। एवं रूपवान् घट इत्यपि न युज्यते। अन्यत्वासम्भवादेव च रूपघटयोराधाराधेयकल्पनाया अपि नास्ति सिद्धिरिति[1]

न विद्यते घटे रूपं न रूपे विद्यते घटः ॥

रूपघटयोरन्यत्वे सति घटे रूपमिति स्याल्कुण्ड इव दधि।[2] रूपेऽपि घट इति स्याल्कट इव देवदत्तः। न चेतत्सम्भवतीति नास्ति घटः स्वभावतः। यस्य च नास्ति स्वभाव [3]उपलभ्यते च तदलातचक्रादिवत्तुभावशून्यम्। यथा च घटः स्वभावतो नास्ति तथा सर्वभावा अपि स्वभावतो मृग्यमाणा न सन्तीति सिद्धा भवत्यलातचक्रादि[4]प्रख्यता भवस्य ॥° २ ॥

328

CSV: अत्राहुरेके। यद्यपि रूपघटयो[रन्यत्वं न सम्भवति तथापि भावघ]टयोरन्यत्वमस्ति। यस्मादन्य एव घटोऽस्माक[5]मन्येव[7] च सत्ता। सत्ता हि नाम महासामान्यं[8] घटश्च विशेषः। द्रव्यं[9] सत्तायोगात्सदिति व्यपदिश्यत इति।[10] तान् प्रत्युच्यते—।

gñis mtshan mi mthun mthoṅ nas ni |
gal te dṅos las bum gz'an na |
ma yin de ltar dṅos po yaṅ |
bum pa las gz'an cis mi ḥgyur‖ 3 ‖

In *c* Vx of CSV *poḥoṅ* for *po yoṅ*.

* वैलक्षण्यं इयोर्दृष्ट्वा भावादन्यो घटो यदि।
न, [11]भावोऽपि घटादन्यो किमेवं न भविष्यति ॥३॥

CSV: घटादिद्रव्याणामनुप्रवृत्तिलक्षणत्वात्सामान्यं[12] भावः। व्यावृत्तिलक्षणत्वाच्च घटो विशेषलक्षण इति। यदि तयोर्वैलक्षण्यं भावघटयोर्दृष्ट्वा

[1] In X read grub for gyur.
[2] Tib. ril bar (X la bar) z'oṅ daṅ t'o ltar=kuṇḍe kuṇḍadadhivat.
[3] Tib. wrongly ad. na (min).
[4] Before -ādi Tib. ad. -nirmāṇa (sprul ba).
[5] Tib. gz'an ñid mi srid mod kyi | de lta na yaṅ dṅos po daṅ bum pa gñis la |
[6] Tib. ad. darśane (ltar na).
[7] Tib. gz'an ñid; HPS anyathaiva.
[8] See Haribhadra's vṛtti on the Nyāyapraveśa (GOS), p. 29: tatra paraṃ sattā bhāvo mahāsatteti cocyate. Generally it is known as parasāmānya. See Praśastapāda-bhāṣya with the Nyāyakandalī, pp. 311-313.
[9] Tib. ad. tasya (de ni). According to it the sentence is: °ghaṭaś ca viśeṣo dravyam | tasya sattāyogāt° (°la bum pa ni khyad par gyi rdzas yin la | de ni yod pa daṅ ḥbrel ba las° |).
[10] It refers to the Vaiśeṣikas.
[11] The actual reading in HPS is ghatād anyo no bhāvo'pi. But it does not give any suitable sense, nor is supported by Tib.
[12] HPS sāmānyo.

भावादन्यो घटो भवत्येवमेव वैलक्षण्याद्भावोऽपि किमर्थं घटादन्यो[1] न भविष्यति।[2] ततश्चान्यबुद्धिध्वनिप्रवृत्ति[3]निमित्तमन्यत्वमपरमनुप्रवृत्तिलक्षणं न कल्पयितव्यम्। वैलक्षण्यादेवान्यबुद्धिध्वनिप्रवृत्तिसिद्धेः। कल्प्यते चापरमन्यत्वमिति।[4] नास्ति तर्हि[5] भावघटयोर्वैलक्षण्यापेक्षमन्यत्वम्। ततश्च यदुक्तं[6]

वैलक्षण्यं द्वयोर्दृष्ट्वा भावादन्यो घट

इति तच्च। यथा च भावोऽनुप्रवृत्तिलक्षणत्वाद्घटादन्य एवमन्यत्वमप्यनुप्रवृत्तिलक्षणत्वाद्घटादन्यत्स्यात्। न च तस्यान्यत्वस्यापरमन्यबुद्धिध्वनिप्रवृत्तिनिमित्तमस्ति। यदि स्यादन्यत्वानामपर्यवसानदोषः स्यात्। अथ विनैवान्यत्वेनान्यबुद्धिरन्यत्वे भवति। तद्वदेवान्यत्रापि सम्भाव्यतामित्यलमन्यत्वेनाकिञ्चित्करेण कल्पितेन। असति चान्यत्वे नास्ति कुतश्चित्कस्यचिदन्यत्वमिति सिद्धम्। अपि चेदं चिन्त्यते। किम्भूतायाः सत्तायाः अन्यत्वेन योगोऽस्तु। किमन्यभूतायाः अनन्यभूतायाः वा। यद्यन्यभूतायास्तदा व्यर्थोऽन्यत्वेन योगः। अथानन्यभूतायाः। एवमपि विरुद्धेनान्यत्वेन योगादन्यत्वेन योगो न प्राप्नोति। अन्यत्वाभावाच्च घटादन्यो भाव इति न युज्यते। ततश्च[7] लोके विपर्यासं प्रमाणीकृत्य घटत्वरूपमेव सदुद्धिध्वनिप्रवृत्तिनिमित्तत्वाद्भाव इति व्यवस्थाप्यते। तस्य च रूपाच्चतुर्धा विचार्यमाणस्य[8] नास्ति स्वभाव इति तत्त्वविदपेक्षयालातचक्रादिवत्स्वभावशून्यो घट इति सिद्धम्॥ ३॥

329

CSV: अत्राह। विद्यत एव घटो गुणाश्रयत्वात्। न ह्यसन् गुणाश्रयो दृष्टः। भवति च गुणाश्रयो घटः। एको घटो द्वौ घटाविति। एकत्वादयो गुणपदार्थसंग्रहीता घटश्च[9] द्रव्यम्। द्रव्याश्रयित्वं च गुणानां सम्भवतीति। अतो गुणाश्रयत्वादस्त्येव घट इति। अत्रोच्यते। त्वन्मतेन—।

[1] Tib. dṅos po yaṅ bum pa las; HPS °vailakṣaṇyād ghaṭād api kimartham bhāvo'nyo.
[2] In the second half of the kārikā there are two negatives, but the commentary in both the texts, Skt. and Tib., takes only one of them. The kārikā may be explained as follows: If you say having seen the diverseness of them two that the ghaṭa is different from bhāva, then we may reply: no; for in that case why is it that bhāva, too, will not be different from ghaṭa
[3] Tib. om. pravṛtti.
[4] Tib. om. iti. See note 5.
[5] HPS anyatvam iti nāsti | tarhi bhāva° |. Tib. °anyatvam atha bhāvaghaṭayor° anyatvaṁ nāsti | tataḥ°. (gz'an ñid° | ḥo na dṅos po daṅ bum pa dag la° gz'an ñid yod pa ma yin no | deḥi phyir° |).
[6] Tib. om.yad uktam.
[7] Tib. om. it.
[8] Tib. vicā ryamāṇe (dpyad pa na).
[9] Tib. bum pa ni; HPS ghaṭāś ca.

gal te gcig bum mi ḥdod na |
bum paḥaṅ gcig tu mi ḥgyur ro |
ldan ḥdi mtshuṅs paḥaṅ ma yin pa |
des kyaṅ gcig tu mi ḥgyur ro|| 4 ||

In *c* Vx of CSV *ni* for *ḥdi*.

* एको यदि घटो नेष्टो घटोऽप्येको न जायते ।
न चायं समयोर्योगस्तेनाप्येको न जायते ॥ ४ ॥

CSV : पदार्थभेदाद्यद्येको घटो न भवतीति मन्यसे घटोऽपि तर्ह्येको न भवति । यद्येकत्व[1]मेकसंख्या घटो न भवत्येवं द्रव्यत्वेनैकसंख्यायाः पृथग्भूतत्वाद्घटोऽप्येको न भवति । द्वित्वा[2]दिति भावः । अपि चास्य[3] घटस्यैकरूपस्य वैक[4]संख्या परिकल्प्यते[5]ऽनेकरूपस्य वा । यद्येकरूपस्य तदा व्यर्थैवैकत्वकल्पना । अथानेकरूपस्य तदापि विरुद्धत्वादयुक्तैव । तस्माल्लोके घटस्वरूपस्यैवासन्निहितार्थान्तरस्यैक[त्व]कल्पना विज्ञेया । अथ द्रव्याश्रयिणो गुणा इति कुत्वैकत्वयोगाद्घट एवको भवति न त्वेकत्वं घटो[6] भवतीति[7] । अत्रोच्यते

न चायं समयोर्योगस्तेनाप्येको न जायते ॥

योगो नाम समयोरेव न विषमयोः ।[8] तत्रैकगुणो दृष्टो घटः ।[9] द्रव्यगुणयोश्च समता यस्मान्न भवति तस्मात्तयोर्योग एव न भवति । योगाभावात् तत्र यदिष्टमकैत्वयोगाद्घट एवैको भवतीति तन्न । यदि चात्र योगो दृष्टस्तदैकेनापि घटस्य योगः स्याद्घटेनाप्येकस्य ।[10] स च नैवं सम्भवतीति[11] योग एवानयोर्नोपपद्यते[12] । योगाभावाच्च[13] नैवैको घटो भवतीति न घटोऽप्येक इति ।

[1] Tib. ad. idam (de).
[2] Tib. dvitvādivad (gñis ñid la sogs pa bz'in no).
[3] Tib. om. asya.
[4] HPS ca for vā.
[5] HPS °kalpe vāneka°.
[6] Tib bum par ; HPS, byārtha (7).
[7] Tib. ad. iti or iti cet (z'es na).
[8] Tib. ad. yathā yogo dviṣṭha ity ubhayor api bhrātror bhrātṛtvasambandha iti na kiñcid anucitamiva. ekaghaṭau tu na samau, ghaṭa evaikatvayogād, ekatve ca ghaṭāyogāt. guṇā dravyāśrayiṇa ity abhyupagamāt (dper na ldan pa gñis la gnas pas spun gñi ka la yaṅ spun zla ñid daṅ ḥbrel ba yin gyi gaṅ yaṅ ruṅ ba ni ma yin pa bz'in no || gcig daṅ bum pa gñis ni mtshuṅs pa ma yin te | bum pa kho na gcig ñid daṅ ldan paḥi phyir la gcig ñid bum pa daṅ mi ldan paḥi phyir te | yon tan rnams ni rdzas la brten paḥo z'es khas blaṅs paḥi phyir ro ||).
[9] Tib. mthoṅ la bum pa ni ; HPS ghaṭaś ca dravyam.
[10] After tadā Tib. ghaṭasyāpy ekena yogo 'śparśasyāpy anekenayogaḥ syāt (bum pa yaṅ gcig daṅ idan par ḥgyur ba ma rig kyaṅ du ma ldan par ḥgyur na||).
[11] Tib. srid pa yaṅ ma yin pas ; HPS bhavatīti.
[12] Tib. na bhavatīti (med pas) for nopa°.
[13] Tib. om. it.

तदत्र पूर्वार्द्धेन कारिकाया[1] योगमभ्युपेत्य दूषणमुक्तम्। उत्तरार्द्धेन तु योगासम्भवे[2] दूषणमुक्तम्। अपिशब्दश्च दूषणकारणसमुच्चयार्थो द्रष्टव्यः ॥४॥

330

CSV: अपि चेदमयुक्ततरं परसमये दृश्यते यद्द्रव्याश्रयिणो गुणा व्यवस्थाप्यन्ते न गुणाश्रयिणो विशेषगुणाः। युज्यते च गुणानामपि गुणाश्रयित्वम्। इह यत्परिमाणो घटस्तदाश्रयिणापि[3] रूपेण तावतैव भवितव्यम्। ततश्च द्रव्यवद्रूपस्यापि महत्त्वं प्राप्नोतीति—।

gaṅ tshe rdzas ji tsam gzugs na |
de tshe gzugs chen ci ste min |
gal te phyir rgol gz'an min na |
gz'uṅ lugs bsñad par bya bar ḥgyur ‖ 5 ‖

In *a* Vx of CSV adds *de* after *tshe*; for *ji* all excepting Vx of CSV once *ci*.

* यावद्द्रव्यं यदा रूपं तदा रूपं महच्च किम्।
समयो जायते वाच्यः प्रतिवाद्यपरो[4] यदि ॥५॥

CSV: यदा यावद्द्रव्यं यावान् द्रव्यस्यायाम[5]विस्तारात्मकः सन्निवेशस्तावद्रूपं रूपस्यापि तावानेवायामविस्तारात्मकः सन्निवेश इति परेणाभ्युपगम्यते[6] तदा नियतमणुमहति द्रव्ये रूपेणापि तत्राणुमहता भवितव्यम्। तत्किं नु[7] खल्वत्र कारणं यद्द्रव्यव[8]द्रूपस्याणुमहत्त्वे नेष्येते। अथ स्याद्रूपं गुणोऽणुत्वं महत्त्वमपि च गुण एव। न च गुणे गुणस्य सन्निवेशो भवतीति समय एषोऽस्माकम्। ततश्च यद्यपि यावद् द्रव्यं रूपमपि तावदेव तथापि सिद्धान्तविरोधभयाद्रूपस्याणुत्वमहत्त्वे न स्त इति। उच्यते।

समयो जायते वाच्यः प्रतिवाद्यपरो यदि ॥

यदि हि तव स्वयूथ्य एव प्रतिवादी स्यात्तं निर्वर्तयितुं युक्तं तव सिद्धान्ताभिधानम्। तस्य तं बाधितुं सामर्थ्यात्।[9] यदा तु प्रतिवादी परस्तं[10]

[1] Tib. om. it.
[2] Tib. yogāsambhavena, lit. yogāsambhavadvāreṇa (ldan pa mi srid paḥi sgo nas).
[3] Tib. deḥi rten can gyi; HPS tadāśrayeṇāpi.
[4] Mark that apara does not mean here 'other' as is generally known, but 'not other' na paraḥ). The Tib. is very clear: gz'an min=na paraḥ.
[5] In X read dkyus (āyāma) for kyis.
[6] Tib. lit. abhyupagamakāle (khas blaṅs paḥi tshe).
[7] HPS na.
[8] Tib. rdzas bz'in du°, HPS dravyarūpasya.
[9] As supported by Tib. (de la gnod par nus pas). HiyPS tad ādhitum asāmarthyāt.
[10] In X read yin na ni de la for what appears there to bebn la mid la.

प्रति सिद्धान्तविरोधोद्भावनमकिञ्चित्करं सिद्धान्तनिराकरणप्रवृत्तत्त्वा[1]त्तस्य। युक्तिलोकविरोधोद्भावनं तु तं प्रति न्यायस्तद्वारेण तस्य निवर्तयितुं शक्यत्वात्। तस्मादपरिहार एवायं यदिदमागमविरोधोद्भावनमिति स एवाविचलो दोष इति नास्ति भावघटयोरन्यत्वम्। तदत्र सत्तान्यत्वप्रतिषेधेनान्येषामपि घटत्वादीनां सामान्यविशेषाणां प्रतिषेधो विज्ञेयः संख्यावत्सामान्यगुणानां महत्त्ववद्विशेष-गुणाना[2]मिति ॥५॥

331

CSV: अत्राह। उक्तो भावस्य घटा[3]दिभ्योऽन्यत्वप्रतिषेधः। घटस्य तु स्वभावाप्रतिषेधादस्त्येव स्वरूपतो घटाख्यो भाव इति। अत्रो[4]च्यते—।

mtshan ñid kyis kyaṅ mtshan gz'i ni |
gaṅ du grub pa yod min pa |
der ni graṅs sogs tha dad par |
dṅos po yod pa ma yin no ॥ 6 ॥

* लक्षणेनापि लक्ष्यस्य यत्र सिद्धिर्न विद्यते।
संख्यादिव्यतिरेकेण तत्र भावो न विद्यते ॥ ६ ॥

CSV: इह घटसत्त्वयोर्व्यावृत्त्यनुवृत्तिलक्षणं ब्रुवता घटस्य व्यावृत्ति-लक्षणं व्यवस्थापितं परेण। तदमुना लक्षणेनापि लक्ष्यस्य नास्ति सिद्धिः। न हि व्यावृत्तिमात्रेण शक्यं वस्तुस्वरूपं निर्धारयितुं यल्लक्ष्यतया वेत्स्यति। एकस्तावद्गुणत्वाद्घटो न भवति। अणुर्महदिति रूपादयश्च गुणत्वादेव घटाख्यान भवन्ति। [5]सत्तापि द्रव्यगुणकर्मसु[6] सामान्याद्घटो न भवति। तदयं संख्याणुमहद्रूपादिभ्यो व्यावर्तमान इत्यंस्वभाव इति न शक्यं व्यवस्थाप-यितुम्। तदेवं यत्र परवादिपक्षे लक्षणेनापि लक्ष्यस्य घटस्वरूपस्य नास्ति सिद्धिस्तत्र पक्षे संख्यादिव्यतिरेकेण सिद्ध[7]स्वरूपेण घटाख्यो भावो न विद्यते। ततश्च स्वभावशून्यो घट इति सिद्धम्।

अथ वा[8] संख्यादयो घटस्य लक्षणम्। तैर्लक्ष्यमाणत्वाद्घटो लक्ष्यः। तस्य लक्षणेनापि पृथक्[9]स्वरूपसिद्धि[10]रशक्या कर्तुम्[11]। संख्यादिव्यतिरेकेण

[1] For -pravṛttatvāt Tib. -cittatvāt (thugs pahi phyir).
[2] Tib. bye brag gi yon tan rnams; HPS viśeṣāṇām.
[3] Tib. bum pa°; HPS paṭā°.
[4] Tib. om. atra.
[5] Tib. ad. tat- (de).
[6] Tib. °karmaṇāṃ (°las rnams kyi).
[7] Tib. om. siddha-.
[8] Tib. ekadhā (rnam pa gcig tu).
[9] Tib. om. it.
[10] Tib. -susiddhi°, reading legs (X logs) su grub.
[11] Tib. nāsti (yod pa ma yin te) for aśakyā°.

तत्स्वरूपस्यानुपलभ्यमानत्वात्। यदि हि तल्लक्ष्यं स्वरूपं लभते तदा नियतं संख्यादिव्यतिरेकेण गृह्येतेदं तत्संख्यादि[1] व्यतिरिक्तं घटस्वरूप[2]मिदं पुनरस्य संख्यादिकं[3] लक्षणमिति। न चैतदेवमित्यतो

लक्षणेनापि लक्ष्यस्य यत्र सिद्धिर्न विद्यते।
संख्यादिव्यतिरेकेण तत्र भावो न विद्यते॥

इति नास्ति स्वभावतो घटः॥ ६॥

332

CSV: उक्तस्तावल्लक्ष्यलक्षणयोरन्यत्वप्रतिषेधः। येषां तु रूपादिभिर्घटस्यैक्यमिति सिद्धान्तस्तत्प्रतिषेधायेदमुच्यते—।

mtshan ñid rnams daṅ so so ni |
min phyir bum pa gcig ma yin |
re reḥi bum pa med na ni |
maṅ ñid ḥthad par mi ḥgyur ro || 7 ||

• घटस्य न भवेदैक्यमपृथक्त्वाद्धि लक्षणैः।
एकैकस्मिन् घटाभावे बहुत्वं नोपपद्यते॥ ७॥

CSV: रूपादीनि खलु नानालक्षणानि येषां तैरपृथक्त्वं[4] घटस्येष्टम्। तेषां[5] रूपादिभिर्लक्षणैरपृथक्त्वाद्[6] घटस्यैक्यं नोपपद्यते। बहुभिरनन्यत्वात्। स्यात्तत्र मतम्। यदि घटस्यैक्यं न भवति हन्त बहुत्वं प्राप्तमिति। अत्रोच्यते। यस्माद्रूपादिष्वेकैकस्मिन् घटस्याभावो दृष्टस्तस्माद्बहुत्वमपि नास्तीति॥ ७॥

333

CSV: अत्राह। यदि रूपादिभिर्लक्षणैरपृथक्त्वाद्घटस्यैक्यं नास्ति तेषां परस्परसंयोगाद्घटस्यैक्यं भविष्यतीति अत्रोच्यते—।

reg ldan reg daṅ mi ldan daṅ |
lhan cig sbyor ba z'es bya med |
deḥi phyir gzugs sogs rnams sbyor ba |
rnam pa kun tu rigs mi yin || 8 ||

[1] Tib. la sogs; HPS om. ādi-.
[2] For ghaṭasvarūpam Tib. svarūpeṇa (raṅ gi ṅo bos).
[3] Tib. saṃkhyādivyatiriktaṃ (graṅs la sogs pa las tha dad par).
[4] Tib. so so ma yin pa ñid du; HPS pṛthaktvaṃ.
[5] Tib. ad. daṙśane.
[6] Tib. so so ma yin paḥi phyir; HPS apṛthaktvaṃ.

In *b* and *c* V wrongly *spyor* for *sbyor*. In *c* V and Vx of CŚ *de* for *dehi*. In *d* Vx of CŚV ad. *ḥdi* between *tu* and *rigs*.

* न ह्यसर्शवतो नाम योगः सर्शवता सह।
रूपादीनामतो योगः सर्वथापि न युज्यते ॥ ८ ॥

CŚV: तत्र स्पृष्टिः स्पर्शः कायेन्द्रियग्राह्यता। स्पर्शोऽस्यास्तीति स्पर्शवत्। स्प्रष्टव्यमेव कायेन्द्रियग्राह्यत्वात् स्पर्शवत्। तेन[2] स्पर्शवता स्प्रष्टव्येन रूपरसगन्धानामस्पर्शवतां[3] योगः संयोगः संस्पर्शो न सम्भवति। यथा घटस्याकाशेन। यत एतदेवं

रूपादीनामतो योगः

सर्वप्रकारं न सम्भवति। यदा च न सम्भवति[4] तदान्योन्यसंस्पर्शवक्तादृपादीनां विशेषात्समुदायनिबन्धनो घट इति यदुक्तं तन्न युक्तम् ॥ ८ ॥

334

CŚV: अथ विनाप्यन्योन्यसंस्पर्शेन तत्समुदाय एव घट इति स्यात्। एतदपि नास्ति। यस्मात्[5]—।

gzugs ni bum paḥi yan lag ste |
des na re z'ig de bum min |
gaṅ phyir yan lag can med pa |
des na yan lag kyaṅ yod min ||9

In *b* Vx of CŚV *de ni* for *des na*. In *d* V wrongly *yon* for *yod*.

* घटस्यावयवो रूपं तेन तावन्न तद्घटः।
यस्मादवयवो नास्ति तेन नावयवोऽपि तत् ॥ ८ ॥

CŚV: रूपादिसमुदयरूपस्य घटस्य प्रत्येकं रूपादयोऽवयवभूतत्वाद् घटव्यपदेशभाजो न भवन्ति। घटोऽवयवी अवयवाश्च रूपादय इति रूपं तावदवयवत्वाद्घटो न प्राप्नोति।[6] यथा च रूपमेवं गन्धादयो वाच्याः। ननु च रूपस्यावयवत्वादस्ति तर्ह्यसावयवी नाम कश्चित्। न ह्यवयविनरपेक्षा अवयवा युज्यन्त इति। उच्यते। इह रूपादीनां प्रत्येकं घटत्वाभावे[7]

[1] Tib. so' (de) for sparśo'.
[2] In X read de for what seems to be re.
[3] HPS asparśavatā.
[4] Tib. yadaivaṁ (gaṅ gi tshe de ltar yin pa) for yadā° sambhavati.
[5] Tib. lit. tathā hi (ḥdi ltar), but often the Tib. phrase is used for yasmāt.
[6] Tib. lit. bhavati (yin).
[7] In X read med for de.

कुतः कस्यिदवयवी। नहि रूपादिव्यतिरेकेणावयवी नाम परिच्छेत्तुं पार्यते। न चापरिच्छिद्यमानस्वरूपस्य सत्त्वमाख्यातुं शक्यमित्यसन्नवयवी। यस्माच्चावयवी नास्ति तस्माद्रूपमवयवत्वेनापि न सम्भाव्यत इति न स्त एवावयवावयविनौ ॥ ९ ॥

335

CSV: इतश्च रूपादिसमुदायो न घटः। यस्मात्—।

gzugs rnams kun laḥaṅ gzugs ñid ni |
mtshan ñid mi mthun ma yin no |
gcig la bum pa yod ḥgyur z'iṅ |
gz'an dag la min rgyu ci z'ig ‖ 10

In *a* V and Vx of CS *la* for *laḥaṅ*. In *b* V *na* for *no*.

• सर्वेषामपि रूपाणां रूपत्वमविलक्षणम्।
एकस्य घटसङ्गावी नान्येषां किं नु कारणम् ॥ १० ॥

In *d* for *kiṃ nu* as required and supported by Tib. HPS *kiṃ na* which is followed by V.

CSV: सर्वेषामपि रूपाणामिति रूपस्कन्धसंगृहीतत्वाद्रूपगन्धादयो रूपाणीत्युच्यन्ते।[1] तानि रूपाणि घट इव पटादिष्वपि सन्ति। न च तानि घटादिभेदेऽपि स्वलक्षणं व्यभिचरन्ति। सर्वत्रैव तुल्यलक्षणत्वात्। तत्र यथैकस्य रूपस्य घटत्वेनावस्थानं तथान्यस्यापि पटादि[2]सम्बन्धिनो रूपस्य कस्माद् घटत्वेनावस्थानं नेष्यते। युज्यते तु तस्यापि घटत्वेनावस्थानं लक्षणाभेदाद् घटा[3]वस्थितरूपादिवत्। एवं त्वनभ्युपगमे कारण[4]मेव न सम्भवति। ततश्च सर्वेषामेव घटत्वं प्राप्नोति। यद्वा घटस्यापि घटत्वं न प्राप्नोति। यथा च घटादीनामभेदप्रसङ्ग एवं रूपगन्धादीनामप्यभेदप्रसङ्गः[5] प्राप्नोति। एकस्माद् घटादनन्यत्वात् ॥ १० ॥

336

CSV: अथ मन्यसे यद्यपि घटादन्यत्वमेषां [नास्त्येव तथापि][6] रूपस्य रसादिभ्यो भेदोऽस्ति। तस्मादभेदप्रसङ्गाभाव इति। एतदप्ययुक्तमिति प्रतिपादयन्नाह—।

[1] Tib. om. ucyante.
[2] Tib. snam bu la sogs: snam bu means kambala, but it is taken here in the sense of paṭa. HPS ghaṭādi-.
[3] Tib ghaṭatvā°. [4] Tib. rgyu; HPS karaṇa°. [5] Tib. thal bar. HPS om. prasaṅga.
[6] Tib. ma yin pa ñid yin mod kyi | de ltar na yaṅ; HPS om. it.

ro sogs dag las gzugs gz'an z'iṅ |
bum las min z'es khyod ḥdod na |
de nams ma gtogs raṅ med gaṅ |
de gzugs las gz'an ji ltar min ‖ 11 ‖

In *b* Vx of CŚV ad. *pa* between *bum* and *las* and om. *khyod*; and reads *rtogs* for *gtogs* in *c*, and *gaṅ du* for *de* omitting *las* in *d*.

* रूपमन्यद्रसादिभ्यो न घटादिति ते मतम् ।
स्वयं यस्तैर्विना नास्ति स नान्यो रूपतः कथम् ॥ ११ ॥

In *c* for *sa nānyo* supported by Tib. and the commenta y HPS *so'nanyo*, and V follows it.

CŚV : यदि भिन्नेन्द्रियग्राह्यत्वाद्रसादिभ्यो रूपमन्यद्व्यवस्थाप्यते घटादपि तद्रूपमन्यदिति किं न व्यवस्थाप्यते । रूपादन्येभ्यो रसादिभ्यस्तस्या[1]-व्यतिरिक्तत्वाद्रसादिस्वात्मवद्रूपादन्य एव प्राप्नोति । न चान्यत्वमिष्यत इत्ययुक्तमेतत् ॥ ११ ॥

337

CŚV : यदा चैवं रूपादीनां घटकारणत्वं न सम्भवति तदा नियतम्—।

bum pa la ni rgyu yod min |
raṅ ñid ḥbras bur mi ḥgyur te |
deḥi phyir gzugs sogs las gz'an du |
bum pa ḥgaḥ yaṅ yod ma yin ‖ 12 ‖

In *c* V and Vx of CŚ *de* for *deḥi*.

* घटस्य कारणं नास्ति स्वयं कार्यं न जायते ।
रूपादिभ्यः पृथक्चाविद्यटस्तस्मान्न विद्यते ॥ १२ ॥

CŚV : रूपादिव्यतिरेकेण कार्यभूतस्य घटस्यानुपलभ्यमानत्वान्नास्ति रूपादिव्यतिरिक्तो घट इति सिद्धम् ॥ १२ ॥

338

CŚV : अथ मन्यसे नैव हि रूपाद्युपादानो घटः । किं तर्हि । स्वावयवानि कपालानि कारणान्यपेक्ष्य घटस्य कार्यत्वं कपालानां च कारणत्व-मिति । एतदप्ययुक्तमित्युद्भावयन्नाह[2]—।

[1] Tib. tha mi dad paḥi phyir ; HPS tasya vyati°.
[2] Tib. asāram ity āha (sñiṅ po med do z'es bśad pa).

bum pa rgyu las ḥgrub ḥgyur z'iṅ |
rgyu ni gz'an las grub gyur na |
gaṅ la raṅ las grub med pa |
de yis gz'an po ji ltar bskyed || 13 ||

In *b* Vx of CŚV *ḥgyur* for gyur.

* घटः कारणतः सिद्धः सिद्धं कारणमन्यतः ।
सिद्धिर्यस्य स्वतो नास्ति तदन्यज्जनयेत्कथम् ॥ १३ ॥[1]

CŚV: यदि घटकारणानि कपालानि प्रतीत्य घटः सिध्यति तानीदानीं[2] कपालानि किमपेक्ष्य सिध्यन्ति । न हि तावत्तानि स्वभावसिद्धानि निर्हेतुकत्वप्रसङ्गात् । अथ तेषामप्यन्यत्कारणमिष्यते । न तर्हि कपालानां स्वरूपसिद्धिरस्ति । तेषामपि कारणान्तरशर्करिकापेक्षत्वात् । येषां च कपालानां स्वतःसिद्धिर्नास्ति कथं तान्यन्यत् स्वरूपतः साधयिष्यन्तीत्यसन् घटः । योऽयं[3] घटप्रतिषेधकविधिरेष[4] एव सर्वकार्याणामसिद्धौ[5] योज्यः ॥[6] १३ ॥

339

CŚV: अत्राह । समुदितानां रूपादीनां घटाभिधानान्न रूपादिबहुत्वेऽपि घटबहुत्वप्रसङ्ग इति । तदप्ययुक्तं समूहस्यैवाभावात् । तथा हि—।

ḥphrod pa ḥdus par gyur kyaṅ gzugs |
dri ñid du ni mi ḥthad de |
des na bum pa bz'in tshogs pa |
gcig ñid du ni mi rigs so || 14 ||

* समवायेऽपि रूपस्य गन्धत्वं नोपपद्यते ।
समूहस्यैकता तेन घटस्येव न युज्यते ॥ १४ ॥

CŚV: समुदिता अपि रूपादयो न समुदायावस्थाः स्वं स्वं लक्षणं विजहति । ततश्च यथा[7] समुदायावस्थायां रूपस्य स्वरूपापरि[8]त्यागाद् गन्धत्वं न सम्भवत्येवमनेकाश्रयस्य समूहस्यैकत्वं न सम्भाव्यते । स हि समुदायो

[1] This kārikā is quoted in MV, p. 89 with the reading paṭaḥ for ghaṭaḥ. Evidently the change is made by one not knowing the context in the original work.
[2] Tib. tadā (deḥi tshe).
[3] Tib. simply yaḥ (gaṅ); HPS yataś cāyam.
[4] Tib. om. it.
[5] Tib. ad. api (yaṅ).
[6] Compare, as Poussin has pointed out, in MV, p. 89, for the last two pādas of the kārikā Śūnyatāsaptati, Mdo, XVII, 27 b, 5.
[7] Tib. ji ltar; HPS om. it.
[8] Tib. -pari° for -apari°; raṅ gi ṅo bos yoṅs su btaṅ ba las=svarūpeṇa parityāgāt.

रूपादिभ्यो न व्यतिरिक्तास्ते च रूपादयः परस्परतो भिद्यन्ते। रूपादिभ्यश्चाव्यतिरिक्तसमुदायः कथमेकः स्यात्। दृष्टान्तमाह घटस्येवेति। यथा

घटस्य न भवत्येकमपृथक्स्थादि लक्षणैः[1]

रित्युक्तं[2] तथेहापि[3]

समूहस्यास्ति नैकत्वमपृथक्स्थादि[4] लक्षणैः

रिति। एवं

समूहस्यैकता तेन घटस्येव न युज्यते ॥ १४ ॥

340

CSV: ततश्च[5] समूहस्यासम्भवाद्रूपादिसमूहेऽपि घटकल्पना न युक्ता। यथोपवर्णितेन च विचारेण—।

ji ltar gzugs sogs ma gtogs par |
bum pa yod pa ma yin pa |
de bz'in rluṅ la sogs pa ni |
ma gtogs gzugs kyaṅ yod ma yin ‖ 15 ‖[6]

* रूपादिव्यतिरेकेण यथा कुम्भो न विद्यते।
वाय्वादिव्यतिरेकेण तथा रूपं न विद्यते ॥ १५ ॥[7]

CSV: रूपादिव्यतिरेकेण यथा कुम्भो न सिद्ध एवं कुम्भप्रसक्तस्योपादाना अपि रूपादयो वाय्वादिमहाभूतचतुष्टयव्यतिरेकेण न युज्यन्ते। निर्हेतुकत्वप्रसङ्गात् ॥ १५ ॥

341

CSV: यथा च वाय्वादिव्यतिरेकेण रूपगन्धादेरसम्भव एवं महाभूतानामन्योन्यव्यतिरेकेण सिद्धाभावात् स्वरूप[8]सिद्धाभावमुद्भावयन्नाह—।

tsha ba me ñid du hgyur te |
tsha ba min pa ji ltar bsreg |

[1] HPS °pṛthaktvāt vilakṣaṇaiḥ.
[2] See kārikā 332 (=XIV. 7).
[3] For tathā (Tib. de bz'in du) HPS tava.
[4] Tib. so so min phyir: HPS °pṛthaktvādila°.
[5] In X add phyir after dehi.
[6] Quoted in MA, p. 244, with better readings:
gzugs la sogs pa ma gtogs par |
ji ltar bum pa yod min ltar |
de bz'in rluṅ sogs ma gtogs par |
gzugs kyaṅ yod pa ma yin no ‖
[7] Quoted in MV, p. 71.
[8] Tib. raṅ gi ño bos; HPS rūpādi°.

des na bud śiṅ z'es bya ba |
yod min de med me yod min ‖ 16 ‖

In *b* V wrongly *bsgreg* for *bsreg*. In *d* Vx of CŚV om. *med*.

* अग्निरेव भवत्युष्णमनुष्णं दह्यते कथम् ।
नास्ति तेनेन्धनं नाम तट्टतेऽग्निर्न विद्यते ॥ १६ ॥

CŚV : इहाग्निर्दग्धा भूतत्रयं दाह्यम् । तदेत[1]दिन्धनाख्यं [2]भूतत्रयमग्निरेव दहति नान्यः । इन्धनमेव च दह्यते[3] नान्यत् । तत्रेन्धनं यद्यग्नि[4]रुष्णमपि दहति तदाग्निरेव तदुष्णं भवति नेन्धनम् । अनुष्णस्यापि दाह्यस्यासम्भवादनुष्णमपि नेन्धनम् । तदेवं सर्वथापि दाह्यस्यासम्भवान्नास्ती[5]न्धनं नाम यद् भूतत्रयात्मकं स्यात् । यदा चैवमग्निव्यतिरेकेणेन्धनं नापरं सम्भवति तदेन्धनाभावे निर्हेतुकोऽप्यग्निर्न सम्भवतीति

तट्टतेऽग्निर्न विद्यते ॥ १६ ॥[6]

342

CŚV : अत्राह । अनुष्णात्मकमेवेन्धनं काठिन्यादिरूपत्वात् । तच्चोष्णस्वभावेनाग्निनाभिभवादुष्णं भवति । उष्णं च सद्दह्यते इति । एवमपि कल्प्यमान इन्धनाख्यो[7]ऽर्थः— ।

gal te zil mnan tsha na yaṅ |
de yaṅ ci ste me[8] mi ḥgyur |
ḥon te me tsha na dṅos gz'an |
me la yod ces byar mi ruṅ ‖ 17 ‖

* अभिभूतोऽपि यद्युष्णः सोऽप्यग्निः किं न जायते ।
अथानुष्णः[9] परोऽप्यग्नौ भावोऽस्तीति न युज्यते ॥ ६७ ॥

CŚV : यद्यग्निनाभिभूत इन्धनाख्योऽर्थोऽनुष्णस्वभावोऽप्युष्णो भवतीति कल्प्यते सोऽप्यग्निरस्तूष्णरूपत्वात् । ततश्च स एवे[9]न्धनाभावः ।

अथानुष्णः परोऽप्यग्नौ भावोऽस्तीति न युज्यते ॥

[1] Tib. om. etad.
[2] Tib. ad. mahā- (chen po.)
[3] In X read sreg for chig.
[4] In X read mes for ches.
[5] After nāsti HPS ad. tena which is not supported by Tib.
[6] See the Agnīndhanaparīkṣā in MK. X.
[7] Tib. ad. saḥ (de).
[8] HPS °ṣṇaparo°.
[9] Tib. om. sa eva.

अथाभिभूतोऽप्यसावर्थोऽनुष्ण एवेष्यते स[1] तस्याग्नेः परोऽपि भाव इन्धनाख्यं भूतत्रयमुष्णविरुद्धत्वादनुष्णस्वभावमग्नावस्तीति न युज्यते। ततश्च भूतत्रयरहितमग्निमात्रमेव स्यात्। न चैषां महाभूतानामन्योन्यं विनाभावः। यदि स्यात् सिद्धान्तविरोधश्च स्यात्।[2] अग्नौ चापरस्य पदार्थस्येन्धनाख्यस्याभावान् निर्हेतुकत्वञ्चाग्नेः स्यादित्ययुक्तमेतत् ॥ १७ ॥

343

CSV: अथ मन्यसे तेजोद्रव्यपरमाणौ भूतत्रयस्याभावादिनापोन्धनेनास्त्येवाग्निरिति। उच्यते—।

gal te rdul la śiṅ med na |
des na śiṅ med me yod de |
gal te de laḥaṅ śiṅ yod na |
gcig gi bdag can rdul yod min ‖ 18 ‖

* इन्धनं यद्यणोर्नास्ति तेनाग्न्यग्निरनिन्धनः।
अणुरेकात्मको नास्ति स्यात् तस्यापीन्धनं यदि ॥ १८ ॥

ततश्च स एव[3] निर्हेतुकत्व[4]दोषप्रसङ्गः[5]। अत एव चाहेतुकत्व[6]दोषप्रसङ्गाद् वैशेषिकाणामिव स्वयूथ्यानां[7]मयुक्तो द्रव्यपरमाणुष्वभ्युपगमः। वैशेषिकपरमाणुवादश्च नवम एव प्रकरणे निषिद्धत्वान्न पूनर्निषिध्यते। अथाग्नेरहेतुकत्वप्रसङ्गभीत्याणावपीन्धनभावः[9] परिकल्प्येत ततः[10]

अणुरेकात्मको नास्ति स्यात्तस्यापीन्धनं यदि।

यद्यणोरिन्धनमस्तीति कल्प्यते न तर्हि तेजद्रव्यपरमाणुरेकरूपोऽस्तीत्यभ्युपेयम् ॥ १८ ॥

344

CSV: न च केवलं परमाणोरेवैकात्मकस्याभावोऽष्टानां द्रव्यानां सहोत्पादनियमादपि खलु तदन्यस्यापि पदार्थस्य—

[1] Tib. om. it.
[2] Tib. na caiṣāṁ° vinābhāvas tasya siddhāntavirodhāt (ḥdi rnams la ni phan tshun med par ḥbyuṅ ba yod pa ma yiṅ pa de ḥgrub paḥi mthaḥ daṅ ḥgal baḥi phyir ro ‖).
[3] For sa eva Tib. tadarthaka eva (de ñid kyi don du).
[4] Tib. rgyu med can ñid; HPS °hetukado°.
[5] Tib. thal ba; HPS simply -doṣaḥ.
[6] Tib. rgyu med pa ñid; HPS °hetukado°.
[7] Vaibhāṣikas and Sautrāntikas. See Sarvasiddhāntasaṃgraha, IV. iii. 4; iv. 4, 13. For further references see Keith: Buddhist Philosophy, 1923, p. 160, note 1.
[8] Tib. ci ste; HPS yathā.
[9] Tib. yod par; HPS °svabhāvaḥ.
[10] Tib. deḥi phyir; HPS om. it.

dṅos po gaṅ gaṅ yoṅs brtag pa |
de daṅ de la gcig ñid med |
gaṅ gis gcig kyaṅ yod min pa |
des na du ma dag kyaṅ med||19||

In *a* Vx of CŚV *yaṅ* for *gaṅ* before *yoṅs*, and *brtags* for *brtag*; and in *c* *yad* for *yod*.

* तस्य तस्यैकता नास्ति यो यो भावः परीक्ष्यते ।
न सन्ति तेनानेकेऽपि येनैकोऽपि न विद्यते ॥ १८ ॥

CŚV: यथा [1]भूतानामेकात्मकत्वं नास्ति तदितरसद्भावात्[2]। एवं भौतिकमपि[3] नास्ति भूतैर्विनाहेतुकत्वप्रसङ्गात्। एवं चित्तेन विना चैत्ता न सम्भवन्ति। नापि चैत्तैर्विना चित्तम्। तथा लक्षणैर्जात्यादिभिर्विना लक्ष्यं रूपादिकं नास्ति। नापि लक्ष्येण विना निराश्रयं लक्षणं सम्भवति। यतश्चैवमेकस्य पदार्थस्य कस्यचित्सिद्धिर्नास्ति तदैककानां समुदायाभावे सत्यनेकसिद्धिरपि दूरोत्सारितेत्याह—

न सन्ति तेनानेकेऽपि येनैकोऽपि न विद्यते ॥
एकस्याप्यसिद्धौ[4] सत्यां समूदितानामपि नास्ति सिद्धिः ॥ १८ ॥

345

CŚV: अथ स्यात्। स्वयूथ्यं प्रत्येवैतद्दूषणमुपपद्यते सहोत्पादनियमाभ्युपगमात्। परं प्रति तु नेदं दूषणं[5] नित्यानां पृथिव्यादिपरमाणूनां तदितरभावसद्भावविवर्जितानामस्तित्वेनाभ्युपगमादिति। तत्राप्ययुक्ततामुद्भावयन्नाह—।

gal te gsum dṅos de gz'an rnams |
med der gcig yod ces ḥdod na |
gaṅ gis kun la gsum ñid yod |
des na gcig ñid yod min yin || 20 ||

In *a* for *gsum* Vx of CŚ *gaṅ la*, and Vx of CŚV *gaṅ na* both omitting *gz'an*. In *b* V and Vx of CŚ *ḥdod* for *yod*. In *c* for *gis* Vx of CŚV *gri*.

[1] Tib. ad. mahā- (chen po).
[2] Tib. de las gaz'an yod pas; HPS taditarasminn itarasadbhāvāt.
[3] HPS ad- kevalaṃ.
[4] Tib. ma grub pa; HPS siddhau for asiddhau.
[5] For paraṃ° dūṣaṇaṃ Tib. simply na tu paraṃ prati (pha rol po la ni mi yin te).

* भावास्त्रयो न सन्त्यन्ये तत्रैकोऽस्तीति चेन्मतम् ।
त्रित्वं येनास्ति सर्वत्र तेनैकत्वं न विद्यते ॥ २० ॥

CSV: having read the first half of the kārikā

एतदप्यसम्यक् । किं कारणम् ।

त्रित्वं येनास्ति सर्वत्र तेनैकत्वं न विद्यते ॥

परस्यापि हि न क्वचिदेको नाम पदार्थोऽस्ति । यस्मात्तत्रापि पृथिवीपरमाणौ द्रव्यत्वमेकत्वं सत्त्वं चेत्येतत्त्रितयमस्ति । तथा गुणे गुणत्वं सत्त्वत्वञ्चेति । यस्मात्त्रितय[1]मस्ति तस्मान्न क्वचिदेको नाम पदार्थोऽस्ति । तथा साङ्ख्यस्य[2] त्रिगुणात्मकं सर्वमित्येकः कश्चित्पदार्थो नास्तीति न कश्चिदुक्तं[3] दूषणमतिवर्त्तते[4] ॥ २० ॥

346

अपि चायं दूषणमार्गः सर्वेषामेव वादिनां पक्षतिराकरणाय विदुषा प्रयोक्तव्य इति मत्वाचार्य आह—।

yod daṅ med daṅ yod med daṅ |
yod med min z'es bya baḥi tshul |
ḥdi ni mkhas pas gcig ñid sogs |
dag la rtag tu sbyar bar bya|| 21||

In *a* Vx of CSV once *pa* for *daṅ* at the end. In *d* V wrongly *pyan* for *sbyar*.

* सदसत् सदसच्चेति सदसन्नेति च क्रमः ।
एष प्रयोज्यो विदुषभिरेकत्वादिषु नित्यशः ॥ २१ ॥

CSV: [5]एकत्वमन्यत्वमुभयं नोभयमित्येकत्वादयः । एतेष्वेकत्वादिषु पक्षेषु वादिना[6] व्यवस्थितेषु सदसत्त्वाद्युपलक्षितो दूषणक्रमः स्वधिया[7] यथाक्रममवतार्यः । तत्र सत्कार्यवादिनः कार्यकारणयोरेकत्वमिति पक्षः । तस्य हि[8] कारणात्मना तत् कार्यं व्यवस्थितमेव सत् कार्यात्मना विपरिणमते । न ह्यसच्छक्यं कर्त्तुम् । यदि ह्यसदु[9]त्पद्येत तदा सर्वतः सर्वसम्भवः स्यात् ।

[1] Tib. anekam (du ma).
[2] Tib. om. uktaṃ
[3] Tib. ad. ātmatvam (bdag ñid).
[4] Tib. plural (rnams). In X read kyis for kyi. In Tib. this word is put just before svadhiyā which follows.
[5] Tib. sudhiyā (blo bzaṅ pos).
[6] Tib. ad. darśane (ltar na).
[7] HPS asan for asat; Tib. om. hy asat.
[8] Tib. ad. api (yaṅ).
[9] Tib. ḥdaḥo: HPS iti vartate for ati°.

न च सर्वतः सर्वसम्भवो दृष्टः। क्षीरादेरिव प्रतिनियतदध्यादिदर्शनात्। तदस्य वादिनः[1] कार्यकारणयोरेकत्वाभ्युपगमात्सदेव कार्यमुत्पद्यत इत्येवमेकत्वपक्षः। तस्मिन्नेकत्वपक्षे सत्कार्यवादपरामर्शेन[2] नित्यं दूषणमभिधेयम्। तच्चोक्तं—

स्तम्भादीनामलङ्कारो गृहस्यार्थे निरर्थकः।
सत्कार्यमेव यस्येष्टम्

इत्यनेन।[3] तथा

सम्भवः क्रियते यस्य प्राक् सोऽस्तीति न युज्यते।
सतो यदि भवेज्जन्म जातस्यापि भवेद्भवः॥[4]
धर्मो यद्यकृतोऽप्यस्ति नियमो जायते तथा।
अथ [कार्ये किञ्चिदपि सत्कार्यस्य न सम्भवः[5] ॥

इत्युक्तम्][6]

de ltar mkhas pa rnams kyis ḥbras bu yod par smra bas ñe bar mtshon paḥi sun ḥbyin pa gcig ñid kyi phyogs la sbyar bar byaḥo ||

ḥbras bu med par smra ba ni rgyu daṅ ḥbras bu dag gz'an ñid du smra ba dag go || de dag gis ni yod pa skye ba don med par sems śiṅ ḥbras bu med pa kho na skyeḥo z'es rtogs te | de dag gi gz'an ñid kyi phyogs la yaṅ ḥbras bu med pas ñe bar mtshan paḥi sun ḥbyin par brjod par byaḥo || de yaṅ

ḥbras bu med ñid gaṅ ḥdod la |
khyim gyi don du ka ba la |
sogs paḥi rgyan ni don med ḥgyur ||

z'es bśad do ||

gaṅ dag rgyu daṅ ḥbras bu gñis gcig ñid du ḥgyur la gz'aṅ ñid du yaṅ ḥgyur ro sñam du rtog pa de dag ni ḥbras bu yod pa daṅ med par smraḥo || de dag ni lhas sbyin srog gi bdag ñid du

[1] Tib. ad. darśane (ltar na).
[2] For -parāmarśena Tib. lit. -adhikāradvārā or -adhikāramukhena (dbaṅ baḥ sgo nas).
[3] XI. 15. [4] XI. 10. [5] XI. 12.
[6] Tib.
cuṅ zad byed ni yaṅ | ḥbras bu yod ma mi srid do ||
z'es basad do||

rnam par gnas śiṅ lhas sbyin gyi bdag ñid du rnam par mi gnas par skye bar ḥdod la | de bz'in du gaṅ bu daṅ dpuṅ rgyan la sogs pa gser gyi bdag ñid du rnam par gnas śin gaṅ bu daṅ dpuṅ rgyan la sogs paḥi bdag ñid du rnam par mi gnas pa rnams skye bar rtogs so || de dag gi gcig ñid daṅ gz'an ñid gñi gaḥi phyogs la ḥbras bu yod pa daṅ med par smra ba dgag pas ñe bar mtshon paḥi sun ḥbyin pa brjod par byaḥo || de yaṅ

ḥbras bu yod ñid gaṅ ḥdod par |

z'es pa la sogs pas bśad de || rgol ba gñis kyi phyogs kyi skyon phyogs gcig la sbyar bar bya ba ḥdi ni khyad par ro ||

gaṅ dag gi ltar na bum pa la sogs paḥi dṅos po med par raṅ gi rgyu dag las gcig ñid daṅ gz'aṅ ñid du brjod du med pa dag dṅos po rdzas[1] su yod paḥi rgyu can yin pa de dag la yod pa daṅ med par smra ba bzlog paḥi sgo nas yod pa yaṅ ma yin med pa yaṅ ma yin pa z'es bya ba dpyad par sun ḥbyin pa brjod par bya ḥo || de yaṅ gñi ga srid na ni de dag bkag paḥi sgo nas gñi ga ma yin pa z'es bya bar ḥgyur na | gaṅ gi tshe ḥdi gñi ga mi srid pa deḥi tshe gaṅ bkag pas gñis ma yin paḥi rtog par ḥgyur z'es don gyis bśad zin pa ñid do || de ltar na go rim ji lta ba bz'iṅ du

yod daṅ med daṅ yod med pa |
yod med min z'es bya baḥi tshul |
ḥdi ni mkhas pas gcig ñid sogs |
dag la rtag tu sbyar bar bya ||

gz'an dag ni gal te gcig ñid daṅ gz'an ñid la sogs paḥi tshul kho nas dṅos po rnams bkag gam ḥon te tshul gz'an gyis kyaṅ yin z'e na || brjod par bya ste |

yod daṅ med daṅ yod med daṅ |
yod med min z'es bya baḥi tshul |
ḥdi ni mkhas pas gcig ñid sogs |
dag la rtag tu sbyar bar bya ||

yod pa daṅ med pa daṅ | yod kyaṅ yod la med kyaṅ med pa daṅ | yod pa yaṅ ma yin med pa yaṅ ma yin pa z'es bya baḥi tshul ḥdi ni mkhas pa rnams kyis gcig ñid la sogs pa phyogs bz'i[2]

[1] X rjas.
[2] X bz'in.

la rtag tu kho na sbyar bar byaḥo || de la yod pa z'es bya ba ni bdag[1] pa z'es bya baḥi don to || med pa z'es bya ba ni bdag pa ma yin pa z'es bya baḥi don to || yod kyaṅ yod la med kyaṅ med ces bya ba ni bdag[1] kyaṅ bdag[1] la med[2] kyaṅ mi bdag[1] ces bya baḥi don to | yod pa yaṅ ma yin med pa yaṅ ma yin z'es bya ba ni bdag[1] pa yaṅ ma yin mi bdag[1] pa yaṅ ma yin z'es bya baḥi don to || gcig ñid sogs dag la z'es bya ba ni gcig ñid daṅ gz'an ñid daṅ gñi ga daṅ gñi ga ma yin pa z'es byaḥo || de la gñis sam maṅ po rnams la gcig ñid dam gz'an ñid daṅ | gñi ga daṅ gñi ga ma yin pa z'ig tu ḥgyur graṅ na | de la gaṅ dag gi snam bu daṅ dkar po gcig ñid ces bya ba phyogs yin pa de la yod pa z'es bya baḥi tshul ḥdi yul daṅ dus daṅ mtshan ñid las sbyar bar byaḥo || de la re z'ig yul las ni gal te snam bu daṅ dkar po dag gcig ñid yin na | gaṅ daṅ gaṅ na dkar po yod pa de daṅ de na snam bu yaṅ yod par ḥgyur bar bya dgos so || gaṅ daṅ gaṅ na snam bu yod pa de daṅ de na dkar po ḥaṅ yod par ḥgyur bar bya dgos so || ci ste gaṅ daṅ gaṅ na dkar po yod pa de daṅ de na snam bu yod par mi ḥgyur z'iṅ | gaṅ daṅ gaṅ na snam bu yod pa de daṅ de na dkar po yod par mi ḥgyur na ni | de na snam bu daṅ dkar po dag gcig ñid yin no z'es gaṅ ḥdod na de mi ḥthad de | yul tha dad paḥi phyir ro || dus las kyaṅ ste | de la dus ni rnam pa gsum ste | ḥdas pa daṅ ma ḥons pa daṅ da ltar ro || de la ḥdas pa la ni ḥdas paḥi gnas skabs kho nar sṅar skyes paḥi dkar po mthoṅ ṅo || gal te snam bu daṅ dkar po daṅ gcig ñid yin na ni deḥi tshe gal te dkar po sṅar skyes na ni snam bu yaṅ sṅar skyes par ḥgyur dgos so || ci ste snam bu phyis skyes na | dkar po yaṅ phyis skye bar ḥgyur dgos to || gal te dkar po sṅar skyes na ni da lta na snam bu phyis skye ba yin la | gaṅ z'ig sṅar skyes pa daṅ gaṅ z'ig phyis skyes pa de dag ni gcig ñid du mi ḥgyur te | skye baḥi rim pa tha dad paḥi phyir ro || gz'an yaṅ gal te snam bu daṅ dkar po dag gcig ñid du ḥgyur na ni deḥi tshe dkar po z'ig na snam bu ḥjig par ḥgyur dgos la || snum bu z'ig na yaṅ dkar po ḥjig par ḥgyur dgos na || gaṅ gi tshe dkar po z'ig na dkar po ḥjig par ḥgyur gyi snam bu ḥjig par mi ḥgyur la | snam bu z'ig na yaṅ snam

[1] X bdog.

[2] For med X mi bdog.

bu kho nar ḥjig par ḥgyur gyi dkar po ḥjig pa ni ma yin te | de la snam bu daṅ dkar po dag gcig ñid do z'es gaṅ ḥdod pa de ma yin te | ḥjig pa daṅ mi ḥjig pa tha dad paḥi phyir ro ||

gz'an yaṅ dkar po z'es smra na dkar po z'es bya ba kho na smras par ḥgyur gyi[1] snam bu z'es smras pa ni ma yin no || snam bu z'es smras na yaṅ snam bu kho na smras par ḥgyur gyi dkar po z'es smras pa ni ma yin no || gaṅ gi phyir dkar po z'es smra na dkar po z'es bya ba kho na smras par ḥgyur gyi snam bu z'es smras par mi ḥgyur la | snam bu z'es smras na yaṅ snam bu kho na smras par ḥgyur gyi dkar po ma yin pa deḥi phyir yaṅ de dag gcig tu mi ḥgyur gyi smras pa daṅ ma smras pa tha dad paḥi phyir ro || mtshan ñid [daṅ mtshan gz'i tha dad][1] las kyaṅ ste | ḥdi na mtshan ñid ni dkar poḥi ṅo bo yin la | mtshan gz'i ni snam bu yin na gal te de gñis gcig ñid du ḥgyur na ni deḥi tshe gal te dkar po mtshan ñid yin na snam bu yaṅ mtshan ñid kho nar ḥgyur ro || gal te snam bu mtshan ñid du mi ḥgyur na ni dkar po yaṅ mtshan ñid du ma gyur cig || gal te dkar po kho na mtshan ñid du ḥgyur gyi snam bu ma yin la snam bu kho na mtshan gz'ir ḥgyur gyi dkar po ni ma yin na ni de la snam bu daṅ dkar po dag gcig ñid de z'es gaṅ ḥdod pa der mi ḥgyur to | mtshan ñid daṅ mtshan gz'i tha dad paḥi phyir ro || ji ltar snam bu daṅ dkar po dag gcig ñid bkag pa de bz'in du dṅos po thams cad kyi gcig ñid dgag pa yaṅ rgyas par brjod par byaḥo ||

ḥdir smras pa | snam bu daṅ dkar po dag gcig ñid dgag pa ni smras na | gz'an ñid la brjod par byaḥo || brjod par bya ste | gal te snam bu daṅ dkar po dag gz'an ñid yin z'iṅ | gal te yon ton rdzas la brten paḥi phyir dkar po snam bur mi ḥgyur na ni ji ltar gal te mchod sbyin lhas sbyin z'es bya baḥi spun zla ma yin na lha sbyin yaṅ mchod sbyin gyi spun zlar mi ḥgyur ba ñid yin pa ltar snam bu yaṅ dkar por mi ḥgyur ro ||

gal te dkar po daṅ ldan pa las snam bu dkar por ḥgyur ro z'es ḥdod na | de la yaṅ brjod par bya ste | gal te dkar po daṅ ldan pas snam bu dkar por ḥgyur na | snam bu de ci dkar po daṅ ldan pas dkar poḥi mtshan ñid thob pa z'ig gam ḥon te ma thob pa

[1] Omitted in X. See below.

z'ig yin graṅ na | gal te re z'ig dkar poḥi mtshan ñid thob pas snam bu dkar po ñid du ḥgyur na ni ḥdiḥ snam bu ñid ñams par ḥgyur ro || ci ste dkar poḥi mtshan ñid ma thob pa yin na ni dkar poḥi mtshan ñid ma thob paḥi phyir ldan pa yod kyaṅ snam bu dkar por mi ḥgyur te | de la dkar po daṅ ldan pas snam bu dkar po yin no z'es bya ba gaṅ ḥdod pa de ni[1] ma yin no || ji ltar snam bu dkar por ma ḥgyur ba de bz'in du snam buḥi khyad par gaṅ dag sṅon po daṅ ser po daṅ dmar po daṅ dmar ser daṅ ser skya daṅ phug ron kha dog[1] daṅ nag po daṅ riṅ po daṅ thuṅ ṅu daṅ ḥjam po daṅ rtsub pa la sogs pa de dag las snam bu gz'an ñid yin paḥi phyir thams cad du srid pa med par ḥgyur ro || thams cad du srid pa med pas kyaṅ snam bu ñid du mi ḥgyur ro || ji ltar snam bu ñid du mi ḥgyur ba de bz'in du dṅos po thams cad kyaṅ yon ton gyi khyad par de daṅ de dag la gz'an ñid yin paḥi phyir thams cad du srid pa med par ḥgyur ro ||

ḥdir smras pa | yod pa daṅ med pa dag gi[2] gcig ñid daṅ gz'an ñid la ni dgag pa smra na gñi gaḥi phyogs la yaṅ dag pa brjod par byaḥo || brjod par bya ste | gaṅ gi snam bu daṅ dkar po dag gcig ñid du yaṅ ḥgyur la gz'an ñid du yaṅ ḥgyur ro z'es bya ba phyogs yin pa de la gcig ñid daṅ gz'an ñid dgag pa sṅar bśad pa dag kho nas dgag pa rnam par bśad do ||

gñi ga ma yin pa gaṅ gi phyogs yin pa de ni mdor pa sdus nas dgog pa brjod par byaho || gal te snam bu daṅ dkar po dag gcig ñid ma yin la | gñi ga ñid kyaṅ ma yin na ni gñi gaḥi mtshan ñid ma thob paḥi phyir dkar po yaṅ dkar po ñid ma yin z'in dkar po ma yin pa yaṅ ma yin la snam bu yaṅ snam bu ñid ma yin z'in snam bu ma yin pa yaṅ ma yin no || deḥi phyir mtshan ñid gñi ga ma thob paḥi dkar po la ciḥi phyir dkar po z'es brjod kyi nag po z'es ma yin gaṅ gi phyir dkar po de la dkar po z'es bya ba brjod kyi nag po z'es bya ba ma yin pa deḥi phyir dkar po ñid du yod do || mtshan ñid gñi ga ma thob paḥi snam bu de la yaṅ ciḥi phyir snam bu z'es brjod kyi bum pa z'es ma yin gaṅ gi phyir snam bu de la snam bu de la snam bu z'es bya ba ñid brjod kyi bum pa z'es bya ba ma yin pa deḥi phyir snam

[1] X om. it. [2] X gis.

bu ñid du yod do || de ltar dkar po ñid daṅ snam bu ñid du grub daṅ | gdon mi za bar de dag gcig ñid dam gz'an ñid du ḥgyur dgos la gcig ñid yin na ni slar yaṅ gcig ñid ḥgog paḥi rim pa kho na brjod par byaḥo || gz'an ñid yin na yaṅ gz'an ñid ḥgog paḥi tshul lo || de bz'in du dṅos po thams cad la yaṅ ḥgog paḥi tshul gryas par brjod par byaḥo z'es rnam par ḥchad do ||

=एवं विद्वद्भिः सत्कार्यवादोपदर्शितं दूषणमेकत्वपक्षे प्रयोज्यम्।

असत्कार्यवादिनो हि कार्यकारणयोरन्यत्ववादिनः। ते हि सदुत्पत्तिर्निरर्थेति मन्यमाना असदेव कार्यमुत्पद्यत इति प्रतिपद्यन्ते। तेषामन्यत्वपक्षेऽप्यसत्कार्योपदर्शितं दूषणमभिधेयम्। तच्च

स्तम्भादीनामलङ्कारो गृहस्यार्थे निरर्थकः।
°यस्यासत्कार्यमेव च ॥

इत्युक्तम्।[1]

ये तु कार्यकारणयोरेकत्वमन्यत्वं चेति कल्पयन्ति ते सदसत्कार्यवादिनः। ते हि देवदत्तस्य जीवात्मत्वं व्यवस्थितं देवदत्तात्मत्वं त्वव्यवस्थितमुत्पद्यत इतीच्छन्ति। तथा च मञ्जरीकेयूरादीनां सुवर्णात्मत्वं व्यवस्थितं मञ्जरीकेयूरात्मत्वं त्वव्यवस्थितमुत्पद्यत इति प्रतिपद्यन्ते। तेषामेकत्वान्यत्वोभयपक्षस्य सदसत्कार्यवादप्रतिषेधोपदर्शितं दूषणमभिधेयम्। तच्च

सत्कार्यमेव यस्येष्टम्

इत्यादिनोक्तम्।[2] वादत्रयपक्षदोष एकस्मिन् पक्षे प्रयोज्य इति विशेषः।

येषां तु दर्शने घटादीनामभावेन स्वहेतुभ्योऽन्यत्वमेकत्वं चानभिलाप्यं भावद्रव्यं च सद्धेतुकं[3] तेषां सदसद्वादनिराकरणद्वारा सदपि न भवत्यसदपि न भवतीति विचारेण दूषणमभिधेयम्। तच्चोभयासम्भवे तन्निषेधेन नोभयं भवतीति यदेदमुभयं न सम्भवति तदा कस्य निषेधेन नोभयं भवतीति कल्प्यते इत्यर्थं इत्यनेनोक्तमेव।[4] एवं च यथाक्रमं

सदसत् सदसच्चेति नोभयं चेति च क्रमः।
एष प्रयोज्यो विद्वद्भिरेकत्वादिषु नित्यशः ॥

[1] XI. 15. [2] XI. 15.
[3] The corresponding Tib. passage is not quite clear to me.
[4] I could not trace the passage referred to here. It seems to be some where in the commentary.

अन्ये तु व्याचक्षते। एकत्वान्यत्वादिनैव क्रमेण भावानां प्रतिषेधोऽथवा क्रमान्तरेणापीति चेत्। उच्यते

सदसत् सदसच्चेति नोभयं चेति च क्रमः।
एष प्रयोज्यो विदङ्गिरैकत्वादिषु नित्यशः॥

सच्च। असच्च। सदपि च सतोऽभावोऽसच्च। न सन्न चासत्। इत्ययं क्रमो विदङ्गिरैकत्वादिषु चतुर्षु पक्षेषु नित्यशः प्रयोज्यः। तत्र सदित्यात्मेत्यर्थः। असदित्यनात्मेत्यर्थः। सच्च सतोऽभावोऽसच्चेत्यात्माप्यात्मनोऽभावोऽनात्मापीत्यर्थः। न सन्न चासदिति नात्मापि न चानात्मापीत्यर्थः। एकत्वादिष्वित्येकत्वमन्यत्वमुभयं नोभयमिति। तत्र द्वयोर्बह्वना वैकत्वमनेकत्वमुभयमनुभयं वा भवति। तत्र येषां पटशुक्लयोरेकत्वमिति पक्षस्तेषां सदित्ययं क्रमो विषयतः काललक्षणतश्च प्रयोज्यः। तत्र तावद्विषयतः। यदि पटशुक्लयोरेकत्वं यत्र यत्र शुक्लस्तत्र तत्र पटेनापि भवितव्यम्। यत्र यत्र च पटस्तत्र तत्र शुक्लेनापि भवितव्यम्। अथ यत्र यत्र शुक्लो न तत्र तत्र पटो न च यत्र यत्र पटस्तत्र तत्र शुक्लस्तदा पटशुक्लयोरेकत्वमिति यदिष्यते न तदुपपद्यते। विषयभेदात्। कालादपि। तत्र कालस्त्रिविधः। अतीतोऽनागतो वर्त्तमानश्च। तत्रातीतेऽतीतावस्थायामेव पूर्वजातः शुक्लो दृष्टः। यदि पटशुक्लयोरेकत्वं तदा यदि शुक्लः पूर्वजातः पटेनापि पूर्वजातेन भवितव्यम्। अथ पटः पश्चाज्जातः शुक्लेनापि पश्चाज्जातेन भवितव्यम्। यदि शुक्ले पूर्वजाते वर्त्तमानः पटः पश्चाज्जायते यत् पूर्वजातं यच्च पश्चाज्जातं न तयोरेकत्वम्। उत्पत्तिक्रमभेदात्। अन्यच्च यदि पटशुक्लयोरेकत्वं तदा शुक्ले पटो विलीयेत। पटेऽपि च शुक्लो विलीयेत। यदा शुक्लः शुक्ले विलीयेत न पटः पटेऽपि पट एव विलीयेत न शुक्लस्तत्र पटशुक्लयोरेकत्वमिति यदिष्यते तत्र भवति। विलयाविलययोर्भेदात्।

अन्यच्च। शुक्ल इत्युक्ते शुक्ल इत्येवाह न घट इति। पट इत्युक्ते च पट इत्येवाह न शुक्ल इति। यस्माच्छुक्ल इत्युक्ते शुक्ल इत्येवाह पट इत्युक्तेऽपि च पटमेवाह न शुक्लमिति तस्मान्न तयोरेकत्वम्। उक्तानुक्तयोर्भेदात्। लक्ष्यलक्षणयोर्भेदाच्च। इह लक्षणं शुक्लरूपम्। लक्ष्यः पटः। यदि तयोरेकत्वं तदा यदि शुक्लो लक्षणं पटोऽपि लक्षणमेव स्यात्। यदि पटो न लक्षणं शुक्लोऽपि न लक्षणं स्यात्। यदि शुक्ल एव लक्षणं न पटः पट एव च लक्ष्यो न शुक्लस्तत्र पटशुक्लयोरेकत्वमिति यदिष्यते तत्र भवति। लक्ष्यलक्षणयोर्भेदात्।

यथा पटशुक्लयोरैकत्वं प्रतिषिद्धं तथा सर्वेषां भावानामेकत्वप्रतिषेधो विस्तरशोऽभिधेयः।

अत्राह। पटशुक्लयोरैकत्वप्रतिषेध उक्तोऽन्यत्वं वक्तव्यम्। उच्यते। यदि पटशुक्लयोरन्यत्वं तदा गुणो द्रव्याधेय इति शुक्लो घटो न भवेत्। यथा यदि यज्ञदत्तो देवदत्तस्य भ्राता न भवेद्देवदत्तोऽपि यज्ञदत्तस्य भ्राता न भवेत्। एवं पटोऽपि शुक्लो न भवेत्।

यदि शुक्लयोगात् पटः शुक्ल इतीष्यते। तत्राप्युच्यते। यदि शुक्लयोगात् पटः शुक्लः स्यात् किमयं पटः शुक्लयोगाच्छुक्ललक्षणं प्राप्नोत्यथ न प्राप्नोति। यदि तावच्छुक्ललक्षणं प्राप्नोति। पटस्तेन शुक्ल एव स्यात्पटत्वं चास्य क्षीयेत। अथ शुक्ललक्षणं न प्राप्नोति। शुक्ललक्षणाप्राप्त्या योगसत्त्वेऽपि पटः शुक्लो न भवति। तत्र शुक्लयोगेन पटः शुक्ल इति यदिष्यते तत्र भवति। यथा पटः शुक्लो न भवति तथा ये पटस्य विशेषा नीलः पीतो रक्तो रक्तपीतः कपिलः कपोतवर्णः कृष्णो दीर्घो ह्रस्वः कोमलः कठिन इत्यादयस्तेभ्योऽपि पटोऽन्य एवेति सर्वसम्भवाभावः। सर्वसम्भवाभावे च पट एव न भवति। यथा पटो न भवति तथा सर्वेऽपि भावाः। गुणविशेषा हि तत्तेभ्यो भिन्ना एवेति सर्वसम्भवाभावः।

अत्राह। यदि सदसतोरैकत्वमन्यत्वं च प्रतिषेध्यमुच्यते उभयपक्षः सम्यग्वक्तव्यः। उच्यते। यस्य पटशुक्लयोरैकत्वमन्यत्वं चेति पक्षस्तस्यैकत्वमन्यत्वं च पूर्ववचनैरेव प्रतिषेध्यत्वेन व्याख्यातम्।

यस्य पक्षो नोभयं तस्यापि प्रतिषेधः संचिन्त्योच्यते। यदि पटशुक्लयोर्नैकत्वं न चान्यत्वमुभयलक्षणाप्राप्तेः शुक्लोऽपि शुक्ल एव न भवत्यशुक्लोऽपि न भवति। पटोऽपि पट एव न भवत्यपटोऽपि न भवति। तस्मादुभयलक्षणाप्राप्तस्य शुक्लस्य किमिति शुक्ल इत्यभिधानं न कृष्ण इति। यस्मात्तस्य शुक्ल इत्यभिधानं न कृष्ण इति तस्माच्छुक्ल एव। लक्षणद्वयाप्राप्तस्य च तस्य पटस्य किमिति पट इत्यभिधानं न घट इति। यस्मात्तस्य पटस्य पट इत्येवाभिधानं न घट इति तस्मात्पट एव। तथा च शुक्ल एव पट एव च सिध्यति। अवश्यं च तयोरैकत्वेनान्यत्वेन वा भवितव्यम्। एकत्वे सति पुनरप्येकत्वप्रतिषेधक्रम एवाभिधेयोऽन्यत्वे त्वन्यत्वप्रतिषेधक्रमः। तथा सर्वस्यापि भावस्य प्रतिषेधक्रमो विस्तरशोऽभिधेय इति ॥ २१ ॥

347

CŚV: ḥdir ṣmras pa | gal te de ltar ma grub paḥi phyir dṅos po rnams kyi raṅ bz'in med na rgol **ba de dag** ḥthad pa gaṅ gis dṅos po yod par rtog ce na | de la ḥthad pa ḥgaḥ yaṅ med kyi | ḥon kyaṅ |

अत्राह। यद्येवमसिद्धेर्नास्ति भावानां स्वभाव: कयोपपत्त्या वादिनो भावान् कल्पयन्ति। न तत्र काचिदुपपत्ति.। किन्तु—।

ji ltar rgyun la lta ñes na |
rtag pa yod ces bya bar ḥgyur |
de bz'in tshogs la lta ñes na |
dṅos po yod ces bya bar ḥgyur || 22 ||

In *a* V and Vx of CŚV *rgyu* for *rgyun*, and Vx of CŚV *blta* for *lta*. In *b* V and Vx of CŚ *byar ḥgyur na* for *bya bar hgyur*. In *c* Vx of CŚV *blta* for *lta*.

V yathā kudrṣṭito hetor nityatā nāma jāyate |
kudrṣṭitas tathā skandhe bhāvatvaṃ nāma jāyate || 22 ||

This cannot be accepted as V has adopted the wrong reading *rgyu* for *rgyun* in *a* and translated *tshogs* in *c* by *skandha* for which we have *phuṅ po* in Tib. I may offer the following:

सन्तानदृष्टिदोषे हि नित्यो नाम भवेद्यथा।
सामग्रीदृष्टिदोषे हि भावो नाम भवेत्तथा॥ २२॥

CŚV: ji ltar mar meḥi me lce skad cig re re la ḥjig ciṅ sṅa ma daṅ phyi ma skad cig rgyu daṅ ḥbras bu ḥbrel ba rnam par ma chad par gnas pa la rgyu daṅ rkyen gyi tshogs pa yod na yod paḥi rgyun ḥbyuṅ ba de bz'in du ḥdu byed skyes ma thag tu ḥjig pa thams cad la bdag ñid ji lta buḥi rgyu daṅ rkyen gyi tshogs yod na yod paḥi rgyun rgyu daṅ ḥbras buḥi ḥbrel ba rnam par ma chad par gnas pa thog ma med pa ḥbyuṅ ṅo || deḥi phyir ji ltar rgyun deḥi raṅ gi ṅo bo ji ltar gnas pa ltar ṅes par ḥphrigs śiṅ phyin ci log tu ṅes paḥi phyi rol baḥi draṅ sroṅ rnams la sṅon gyi gnas rjes su dran z'iṅ ḥdir skad cig mar ḥjig pa mṅon sum ma yin pas phuṅ po gcig nas gcig tu brgyud paḥi rgyun la ṅes par mthoṅ ba yin daṅ bdag gam gz'an yaṅ ruṅ ste | dṅos po rtag

pa yod do sñam par ḥbyuṅ ba | de bz'in du tshogs pa de daṅ de la brten na s ḥbyuṅ ba daṅ ḥbyuṅ ba las gyur pa daṅ | sems daṅ sems byuṅ ba daṅ | mtsan ñid gz'i daṅ mtsan ñid la sogs paḥi bdag ñid can daṅ deḥi ñe bar len pa can rtswa daṅ phyam daṅ rdzas la sogs pa tshogs pa khyim la sogs pa daṅ gzugs daṅ dri la sogs paḥi ston (?) tshogs pa bum pa la sogs pa daṅ dṅos po tshogs pa bdag daṅ nam mkhaḥ la sogs pa yod do || tshogs pa las logs śig tu mtsan ñid ma grub paḥi chos ḥbyun ba daṅ ḥbyuṅ ba las gyur pa daṅ | sems daṅ sems las byuṅ ba daṅ | bum pa la sogs pa gzugs brñan daṅ brag cha la sogs pa daṅ ḥdra ba de daṅ de las so so so sor ḥjig rten paḥi phyin ci log tsad mar byas te ḥjig rten gz'ug par bya baḥi phyir ñe bar blaṅs nas sam brten nas raṅ daṅ spyiḥi mtsan ñid du ḥdogs pa tsam z'ig byed la | de dag kyaṅ skye ba na tshogs pa kho na skye z'iṅ tshogs pa kho na ḥgag par ḥgyur ro || deḥi phyir tshogs pa de ji lta ba bz'in ma śes pa daṅ blta ba ñes pas rgol ba dag la sogs pas so la raṅ gi ṅo bos yoṅs su grub paṛtogciṅ phyin ci log tsam las rig pa med paḥi dṅos po kho na rtogs so ||

यथा प्रदीपाग्निशिखायां प्रतिक्षणं विनश्यन्त्यां पूर्वापरयोः क्षणयोर्हेतुफलसम्बन्धेऽविच्छेदेनावस्थिते हेतुप्रत्ययसामग्रीसद्भावे सन् सन्तानो जायते तथा सर्वेषां संस्काराणामुत्पादानन्तरं भग्नानां स्वतो यथावद्धेतुप्रत्ययसामग्रीसद्भावे भावाश्रययोर्हेतुफलयोः सम्बन्धस्याविच्छेदेनावस्थानमनादि प्रवर्तते। तस्मात्तस्य सन्तानस्य यथावस्थितस्वभावदर्शने नियतं सन्दिग्धानां विपरीतनिश्चयानां बाह्यानामधीषां पूर्वनिवासमनुस्मरतामिह क्षणभङ्गप्रत्यक्षेण स्कन्धपरम्परासन्तानस्य नियतं दर्शनमहं परो वेति च युज्यते नित्यो भाव इति मतिः। तथा तां तां सामग्रीं प्रतीत्य भूतभौतिकचित्तचैत्तलक्ष्यलक्षणाद्यात्मकं तदुपादानकं क्षणधरणी[1]द्रव्यादिसामग्रीकं गृहादि रूपगन्धादि[2]सामग्रीकं घटादि भावसामग्रीक(?)मात्माकाशादि च भवति। सामग्रीतः पृथग्भूतो लक्षणासिद्धो धर्मो भूतभौतिकचित्तचैत्तघटादिः। प्रतिबिम्बप्रतिश्रुत्कादिवत्ततस्ततः पृथक्पृथग् लौकिकं विपर्यासं प्रमाणं कृत्वा लोकप्रतिपादनायोपादाय प्रतीत्य वा

[1] In the sense of 'a beam.'
[2] Here Tib. ston which is doubtful is left out untranslated,

स्वसामान्यलक्षणप्रज्ञप्तिमात्रं क्रियते। तेषामपि जाती सामग्येव जायते सामग्येव निरुध्यते। तस्मात्सा सामग्री यथावन्न ज्ञायते दृश्यते चेति दोषेण वादिप्रभृतयो रागस्वभावेन परिनिष्पन्नं कल्पयन्तो विपर्यासमात्रादविद्याभावमेव प्रतिपद्यन्ते ॥ २२ ॥

348

CSV: gal te de ltar dṅos po med pas kho bo cag gi dṅos por lta ba phyin ci log yin na khyod kyaṅ dṅos po khas mi len na dṅos po med par blta bar ḥgyur na de yaṅ śin tu mi rigs te | mthoṅ ba daṅ ma mthoṅ ba daṅ ḥgal baḥi phyir ro z'e na | bśad par bya ste | bdag ni dṅos po med par smra ba ma yin te | rten ciṅ ḥbrel bar ḥbyuṅ ba smra ba yin paḥi phyir ro || ci khyod dṅos por smra ba z'ig gam z'e na ma yin te | rten ciṅ ḥbrel bar ḥbyuṅ ba smra ba yin pa ñid kyi phyir ro || khyod ci smra ba z'ig na | rten ciṅ ḥbral bar ḥbyuṅ bar smra baḥo || yaṅ rten ciṅ ḥbrel bar ḥbyuṅ baḥi don gaṅ z'e na | raṅ bz'in med paḥi don daṅ raṅ bz'in gyis ma skyes paḥi don daṅ | sgyu ma daṅ smig rgyu daṅ gzugs brñaṅ daṅ dri zaḥi groṅ khyer daṅ spul ba daṅ rmi lam daṅ mtshuṅs paḥi raṅ bz'in can gyi ḥbras bu ḥbyuṅ baḥi don daṅ stoṅ pa ñid bdag med paḥi don to | ḥdi ltar |

यद्येवं भावाभावादस्माकं भावदर्शनं विपरीतं तवापि भावानभ्युपगमे भावेन विना दर्शनं भवेत्। तच्चात्यन्तमयुक्तं दर्शनादर्शनविरोधादिति चेत्। उच्यते। भावो नास्तीति न वयं ब्रूमः। प्रतीत्यसमुत्पादवादात्। किं ते भाववादः। न। प्रतीत्यसमुत्पादवादादेव। कस्ते वाद इति चेत्। प्रतीत्यसमुत्पादवादः। कः पुनरर्थः प्रतीत्यसमुत्पादस्य। निःस्वभावोऽर्थः। स्वभावेनानुत्पन्नोऽर्थः। मायामरीचिप्रतिबिम्बगन्धर्वनगरनिर्माणस्वप्नसदृशस्वभावकार्योत्पादोऽर्थः। शून्यतानात्मार्थः। तथा हि—।

gaṅ la brten nas ḥbyuṅ yod pa |
de ni raṅ dbaṅ ma ḥgyur ro |
ḥdi kun raṅ dbaṅ med pa ste |
des na bdag ni yod ma yin || 23 ||

In *b* V *na* for *ni*.

V pratītya sambhavo yasya sa svatantro na jāyate |
asvatantram idaṃ sarvaṃ tenātmā naiva vidyate || 23 ||

I should like to modify the second half taking *bdag* in *d* to mean *ātmanā, svayam* :

प्रतीत्य सम्भवो यस्य स स्वतन्त्रो न जायते ।
न स्वतन्त्रमिदं सर्वं स्वयं तेन न विद्यते ॥ ३२ ॥

CSV : ḥdi na gaṅ la raṅ gi ño bo daṅ raṅ bz'in dag[1] raṅ dbaṅ daṅ gz'an la rag ma las pa ñid yin pa de la ni raṅ las grub pas rten ciṅ ḥbrel bar ḥbyuṅ ba yod pa ma yin na ḥdus byas thams cad rten ciṅ ḥbrel bar ḥbyuṅ ba yaṅ yin no || de ltar na dṅos po gaṅ la brten nas ḥbyuṅ ba yod pa de ni raṅ dbaṅ du mi ḥgyur te | rgyu daṅ rkyen la rag las skye baḥi phyir ro ||

ḥdi kun raṅ dbaṅ med pa ste |

deḥi phyir dṅos po gaṅ la yaṅ bdag ste raṅ bz'in yod pa ma yin no || deḥi phyir ḥdir rten ciṅ ḥbrel bar ḥbyuṅ ba raṅ dbaṅ baḥi ño bo daṅ bral baḥi phyir raṅ dbaṅ baḥi ño bo daṅ bral baḥi don stoṅ pa ñid kyi don yin gyi thams cad dṅos po med paḥi don ma yin no || deḥi phyir ḥdi la rten ciṅ ḥbrel bar ḥbyuṅ ba byas śiṅ sgyu ma daṅ ḥdra ba kun nas ñon moṅs pa daṅ ranm par byaṅ baḥi rgyu la skur pa btab pas de med par lta ba phyin ci log yin la raṅ bz'in yod pa ma yin paḥi phyir na dṅos por lta ba yaṅ phyin ci log yin no || deḥi phyir de ltar na dṅos po raṅ bz'in daṅ bcas par smra ba rnams la rten ciṅ ḥbrel bar ḥbyuṅ ba med pa daṅ rtag pa daṅ chad par lta baḥi skyon du ḥgyur ro ||

ci ste gal te raṅ dbaṅ med paḥi don rten ciṅ ḥbrel bar ḥbyuṅ baḥi don yin na ni ḥo na gaṅ khyed kyis ṅed[2] cag la gnod par ḥgyur ba khyed[3] daṅ ṅed cag la khyad par ci yod sñam du sems na bśad par bya ste | gaṅ khyed kyis rten ciṅ ḥbrel bar ḥbyuṅ baḥi don ji lta ba bz'in rtogs[4] ba daṅ brjod pa mi śes pa ḥdi ni khyad par ro || ji ltar byis pa g'zon nu tha sñad la ma byaṅ bas gzugs brñan la bden par gyur par lhag par sgro btags pas ji lta ba bz'in gnas paḥi raṅ bz'in stoṅ pa ñid bsal nas raṅ bz'in daṅ bcas par rtogs na gzugs brñan rtog mi śes pa de bz'in du khyod kyis kyaṅ rten ciṅ ḥbrel par ḥbyuṅ ba khas blaṅs kyaṅ gzugs brñan

[1] X daṅ. [2] X ṅes. [3] X khyod. [4] X rtog.

daṅ mtshuṅs paḥi rten ciṅ ḥbrel bar ḥbyuṅ ba raṅ bz'in gyis stoṅ pa ñid du gyur kyaṅ raṅ gi ṅo bos ji ltar gnas pa bz'in khoṅ du chud par mi śes te | raṅ bz'in med pa ñid du mi ḥdzin paḥi phyir daṅ | yod pa ma yin pa raṅ gi ṅo bo la yod paḥi raṅ gi ṅo bo ñid du lhag par sgro btags na ḥdzin paḥi phyir ro || brjod kyaṅ mi śes te | raṅ bz'in med pa ñid du mi brjod paḥi phyir daṅ dṅos poḥi raṅ gi ño bo ñid du brjod paḥi phyir ro || deḥi phyir de ltar rtogs pa daṅ brjod mi śes pa na bdag ñid daṅ gz'an ñid bslu bar byed do || deḥi phyir kho bo cag chos tshogs che ba ḥdir gnas pas bstan bcos byed paḥi rtsom pa ḥdi ḥbras bu med pa ma yin no ||

CSV : इह यस्य स्वरूपं स्वभावश्च स्वतन्त्रमपरायत्तं च तस्य स्वत एव सिद्धा न प्रतीत्यसमुत्पादः। संस्कृतास्तु सर्वे प्रतीत्यसमुत्पन्नाः। एवं यस्य भावस्य प्रतीत्यसमुत्पादः स न स्वतन्त्रः। हेतुप्रत्ययाभ्यामुत्पादान्

न स्वतन्त्रमिदं सर्वम्।

तस्माद्यस्य भावस्याधिपतिर्न [स] स्वभावेन विद्यते। तस्मादिह प्रतीत्यसमुत्पन्नस्य स्वतन्त्रस्वरूपविरहात् स्वतन्त्रस्वरूपहितोऽर्थः शून्यतार्थः। न सर्वभावाभावोऽर्थः। तस्मादिह प्रतीत्यसमुत्पन्नं मायावत्। संक्लेशव्यवदानहेत्वपवादात्तदभावदर्शनं विपरीतम्। निःस्वभावत्वाद्भावदर्शनमपि विपरीतम्। तस्मादेवं भावस्वभावत्ववादिनां प्रतीत्यसमुत्पादाभावः शाश्वतोच्छेददृष्टिश्च दोषः।

अथ यद्यस्वतन्त्रार्थः प्रतीत्यसमुत्पादार्थस्तर्हि को भवतामाकं विरोधः कश्च भवतोऽस्माकं विशेष इति। उच्यते। अयं विशेषो यद्भवान्यथा तर्कितमुक्तं च प्रतीत्यसमुत्पादं न वेत्ति। यथा व्यवहाराव्युत्पन्नो बालकुमारः प्रतिबिम्बस्य सत्यतयाध्यारोपणेन यथावदवस्थितस्वभावशून्यतापाकरणात्स्वभावत्वप्रतीतौ प्रतिबिम्बस्य कल्पनां न जानाति भवानपि तथा प्रतीत्यसमुत्पादाभ्युपगमेऽपि प्रतिबिम्बसमं प्रतीत्यसमुत्पादं स्वभावेन शून्यताभूतमपि स्वरूपेण यथावदवस्थितं नावगच्छति निःस्वभावत्वस्याग्रहणादसत्स्वरूपस्य च सत्स्वरूपत्वेनाध्यारोपितस्य ग्रहणात्। उक्तमपि च [भवान्] न जानाति। निःस्वभावत्वस्याकथनाद्भावस्वरूपस्य कथनाच्च। तस्मादेवं तर्कितमुक्तं चाज्ञात्वात्मानमन्यं च वञ्चयति [भवान्]। तस्मादिहास्माकं महति धर्मरागेऽवस्थानाच्छास्त्रकारस्य नायमारम्भो निरर्थकः ॥ २३ ॥

349

CŚV : gaṅ gi phyir ḥgal la yaṅ ṅo bo ñid kyi skye ba yod pa ma yin pa de ñid kyi phyir |

विरोधेऽपि च यस्मान्नास्ति स्वरूपस्योत्पादस्तस्मादेव— ।

ḥbras bu med par dṅos po ni |
kun la ḥdu ba yod ma yin |
ḥbras buḥi don du ḥdu ba gaṅ |
de ni ḥphags pa ma ḥdus paḥo || 24 ||

V vinā kāryeṇa bhāveṣu samavāyo na vidyate |
kāryārthaḥ samavāyo yaḥ sa āryasyāsamanvitaḥ || 24 ||

I think V's *asamanvitaḥ* for *ma ḥdus paḥo* in *d* can in no way be supported. For *ḥdus pa* in the sense of *samavāya* see kārikā 339*a*. I should like to change it as follows :

विना फलेन भावानां समवायो न विद्यते ।
सोऽसमवाय आर्याणां समवायः फलाय यः ॥ २४ ॥

CŚV : gal te dṅos po rnams kyi ḥjug pa raṅ bz'in par ḥgyur na ni de rtag pa daṅ ḥbras bu la bltos par mi ḥgyur te raṅ bz'in ni ḥbras bu la mi bltos so || gcig gi dṅos pos mi[1] ḥgags kyaṅ ḥbras bu cuṅ zad kyi sgrub par mi nus pas tshogs paḥi ḥbras bu bsgrub par bya ba la phan tshun ḥdu bar yaṅ ḥgyur la | gaṅ z'ig ḥbras buḥi ched du ḥdu ba de ni deḥi raṅ bz'in gzigs paḥi ḥphags pa rnams la ḥdu ba med pa z'ig ste bden par gyur pa ñid de mṅon par mi bz'ed do || śes bya baḥi don to ||

= यदि भावानां प्रवृत्तिः स्वाभाविकी स्यात्ते नित्याः स्युः फलनिरपेक्षाश्च । स्वभावो हि फलनिरपेक्षः । नैको भावोऽनिरोधेऽपि स्वल्पमपि फलं साधयितुं शक्नोतीति सामग्र्याः साध्येन फलेनान्योन्यं समवायो भवति । फलनिमित्तस्तु यः समवायः स तत्स्वभावदर्शिनामार्याणामसमवायः । सत्यमेव स नाभिमतो ज्ञेयोऽर्थः ॥ २४ ॥

350

CŚV : de ñid kyi phyir rnam par śes pa dṅos poḥi raṅ gi ṅo bo lhag par sgro ḥdogs par byed pa ñon moṅs pa can gyi mi śes

[1] X ni.

paḥi dbaṅ gis dṅos po rnams la chags pa daṅ ldan z'iṅ ḥkhor ba ḥjug paḥi sa bon du gyur pa rnam pa thams cad du ḥgags pa las ḥkhor ba ldog par rnam pa bz'ag go z'es bstan paḥi phyir bśad pa |

=अत एव विज्ञानं भावस्वरूपमध्यारोपयति । संक्लेशवतोऽज्ञानवशाद्भावेषु रागवतः [पुरुषस्य] संसारप्रवृत्तिबीजस्य सर्वथा निरोधात्संसारनिवृत्तिर्व्यवस्थितेति प्रतिपादयन्नाह— ।

srid paḥi sa bon rnam śes te |
yul rnams de yi spyod yul lo |
yul la bdag med mthoṅ na ni |
srid paḥi so bon ḥgag par ḥgyur || 25 ||

rnal ḥbyor spyod pa bz'i brgya pa las mthar ḥdzin pa dgag pa bsgom pa bstan pa ste | rab tu byed pa bcu bz'i paḥo ||

In *c* for *na* V *nas*, and Vx of CŚV *ba*.

V bhavabījaṃ hi vijñāṅaṃ viṣayās tasya gocarāḥ |
dṛṣṭvā viṣayanairātmyaṃ bhavabījaṃ nirudhyate || 25 ||

I should like to make the following change:

बीजं भवस्य विज्ञानं विषयास्तस्य गोचराः ।
दृष्टे विषयनैरात्म्ये भवबीजं निरुध्यते ॥ २५ ॥

॥ योगाचारे चतुःशतकेऽन्तग्राह्यप्रतिषेधभावनासन्दर्शनं चतुर्दशं प्रकरणम् ॥

CŚV: ji skad bśad paḥi tshul gyis yul raṅ bz'in med par mthoṅ bas chags paḥi rgyu rnam par śes pa srid paḥi sa bon du gyur pa rnam pa thams cad du log pa las ñan thos daṅ raṅ saṅs rgyas daṅ | mi skye bahi chos la brjod pa thub[1] paḥi byaṅ chub sems dpaḥ rnams la ḥkhor ba ldog pa rnam par bz'ag go || de bz'in gśegs paḥi ye śes ḥbyuṅ baḥi sa bon byaṅ chub kyi sems de ni de rnam, la mi ldog ste | thams cad la de bz'in gśegs paḥi ye śes rñed[2] pa gdon mi za bar ḥbyuṅ baḥi phyir ro || gaṅ dag gis byaṅ chub kyi sems rnam pa de lta bu ma bskyed pa de dag gis kyaṅ phyis gdon mi za bar bskyed nas byaṅ chub sems dpaḥi spyod pas bla na med paḥi ye śes thos par bya kho na ste | ḥdi ni ḥphags

[1] X thob,

[2] X rñad;

pa dam pa chos pad ma dkar poḥi mdo la sogs pa la btsal bar byaḥo ||

=यथोक्तेन क्रमेण विषयस्य निःस्वभावत्वदर्शनाद्रागहेतोर्भवबीजभूतस्य विज्ञानस्य सर्वथा निवृत्तेः श्रावकाणां बुद्धानामनुत्पादधर्मकथनसमर्थानां बोधिसत्त्वानां च संसारनिवृत्तिर्व्यवस्थिता। तथागतज्ञानोद्भवबीजं बोधिचित्तं तु तत्तेषां न निवर्त्तते। सर्वेषां तथागतज्ञानलाभस्यावश्यकत्वात्। ये तु तथाविधं बोधिचित्तं नोत्पादयन्ति तेऽपि पश्चादवश्यमुत्पाद्य बोधिसत्त्वचर्यायानुत्तरज्ञानायारम्भं कुर्युः। इदं चार्यसद्धर्मपुण्डरीकसूत्रादौ मृग्यम् ॥ २५ ॥

Chapter XV

ḤDUS BYAS KYI DON DGAG PA SGOM PA BSTAN PA

संस्कृतार्थप्रतिषेधभावनासन्दर्शनम्

351

